Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

no.81 MAUDGALYA PÛRAṆ/
Puranam in Sanskrit.
pages 1 to 156.
5th. canto complete,
in good condition.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

५

॥अथ पंचमस्कंद प्रारंभः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मौ०पु० ॥श्रीगणेशायनमः शौनकउ० श्रुतंमयामहाख्यानंगजाननकथाश्रितं सर्वसौ
१ ख्यकरंतातब्रह्मभूतपदप्रदं १ तथापिनतृप्तिंयामिवपीत्वाब्रह्मामृतंपरं शृणुतोगणरा
जस्यकस्तृप्तिंमुंचतिमानवः २ धन्यावयंमहाभागत्वदास्यंगसमाश्रयात् येचयोग
प्रदागाथावर्ततेत्वन्मुखेद्विज ३ अधुनावदमाहात्म्यंलंबोदरस्यसर्वदं की
दृशोयंगणेशानः कीदृशंब्रह्मतस्यच ४ कतितस्यावताराश्च किंकर्मासोपिवि
घ्नपः किमर्थमागतोभूमौतत्सर्वंवदविस्तरात् ५ सूतउवाच० एवंदक्षेणसंश्रु
त्वागजाननचरित्रकं हृष्टोयोगींद्रमुख्यश्चगाणपत्योथमुद्गलः ६ दक्षउवाच०
गजाननस्यमाहात्म्यंश्रुत्वासंक्षेपतः परं तृप्तोनाहंमहाभागपायंपायंसुधामि
व ७ अतोलंबोदरस्यत्वंचरित्रंवदविस्तरात् सर्वसिद्धिप्रदंपूर्णंश्रवणात्य १

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ठनान्नृणां ७ गणेशस्य कथांयो मानवाः शृण्वंति च पठंति ये श्रावयंति प्रहृष्टांश्च
चत्वारः पुण्यभागिनः ८ धन्यास्ते पुरुषा लोके सादरा मुनिसत्तम कथायां कृति
कृत्य [illegible] कथायां कृति
लोमु [illegible] र्विनोमुद्र
त्वमसु [illegible] ०साक्षा
यस्य [illegible] नःप्रभो १२
ते १३ अधुना शृणु वक्ष्यामि संक्षेपेण चरित्रकं लंबोदरस्य विस्तारेकः समर्थो भ
वेत्प्रभोः १४ संवादं पूर्वसंभूतमग्निनस्य महात्मनः नैध्रुवस्यात्र वक्ष्यामि सर्वसि
द्धिप्रदायकं १५ नैध्रुवो मुनिशार्दूलः प्रणम्य वत्सरं वनं ययौ तपः प्रतिपद्य

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ठनान्नृणां ८ गणेशस्य कथां योगीन्द्र शृण्वंति च पठंति ये श्रावयंति प्रहृष्टंति
चत्वारः पुण्यभागिनः ९ धन्याये पुरुषालोके सोदरामुनिसत्तम कथायांकृति
कृत्यास्ते योगींद्रो योगभूषणाः १० सूत उवाच० एवं तस्यादरं दृष्ट्वा हर्षितो मुद्ग
लोमुनिः जगाद तं महाभागं प्रजापतिं द्रुमादरात् ११ मुद्गल उवाच० साक्षाद्ब्र
ह्मसुतस्त्वं च ब्रह्मतुल्यो न संशयः तत्र किं गणनाथस्य वैचित्र्यं रसयुतः प्रभो १२
यस्यमरवारविंदेषु गणेशस्मरणं भवेत् इच्छामि तस्य दासत्वं नित्यं दक्षप्रजाप
ते १३ अधुना शृणु वक्ष्यामि संक्षेपेण चरित्रकं लंबोदरस्य विस्तारेकः समर्थो भ
वेत्प्रभोः १४ संवादं पूर्वसंभूतमपि तस्य महात्मनः नैध्रुवस्यात्र वक्ष्यामि सर्वसि
द्धिप्रदायकं १५ नैध्रुवो मुनिशार्दूलः प्रणम्य वत्सरं वनं ययौ तपः प्रतिपद्यथैम

महाभागोमहामुनिं १६ सततापतपोघोरं दिव्यवर्षसहस्रकं तपसा तस्यदेवेंद्रा भय
भीतावभूविरे १७ किमयंतपसासाध्यंकर्तुमिच्छतिवाद्रुवः नतुल्यं तपसोस्यात्र ब्रह्मां
डेकिंभविष्यति १८ ततस्तस्याश्रमेकस्मादसित आगतोभवत् मुनिरुत्थायपितृव्यं
प्रणनामकृतांजलिः १९ पुपूजे भक्तिसंयुक्तः कृतांजलिः पुरःस्थितः तस्याज्ञयावि
नीतः सआसनेसंस्थितोभवत् २० तमुवाचमहायोगीसोसितोहितकारकं वचोभा
वेनसंतुष्टोभ्रातृपुत्रंतपोधनं २१ असितउवाच० पुत्रकिंतपसात्वंतेदेहंशोष
सितापस देहशोषण रूपंयत्तेपोमुख्यंनशास्त्रतः २२ अतोदेहं समंत्यक्त्वा
तपोमुख्यंसमाचर येनत्वं ब्राह्मणोभूत्वांतेब्रह्मणिगमिष्यसि २३ सूतउवा०
असितस्यवचःश्रुत्वानैध्रुवोभक्तिसंयुतः पुनःपप्रच्छयोगींद्रंसंज्ञायेनसम।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

न्वितः २४ ध्रुव उवाच० तपो युक्तं स्वधर्मेण यथाविधि कृतं मुने तपो ब्रुवंति स
र्वज्ञास्तत्र मुख्यं किमप्यहो २५ अखिल उवा० तपश्च विविधं प्रोक्तं तापदं नात्र सं
शयः तच्छृणुष्व विधानेन योगिवंद्यो भविष्यसि २६ कृच्छ्रचांद्रायणादीनि तपांसि भव
न्ति च पंचाग्निसाधनादीनि वायुभक्षात्मकानि च २७ इत्यादि बहवो भेदास्तपसो
विविधस्य च तदेव वाङ्मनोभावस्तु जानीहि पुत्र निश्चितं २८ इहामुत्र प्रदं तात त
पः फलमयं स्मृतं फलं भुक्त्वा पुनः सोपि दीनरूपो भवेत्किल २९ अन्यच्छृणु म
हाभाग तपः परमदुश्चरं वायुरोधात्मकं देहे प्राणायामेन जायते ३० तच्च प्रा
णस्य संतापो जायते नात्र संशयः देहस्थापितवायुश्च तेन संतप्यते दुच्यते ३१ षट्चक्र
भेदने दक्षं मंत्रध्यानपरायणः सहस्रारे गतं वायुं रोधयेत्तत्र लालसः ३२ तेन तपः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

२ प्रभावेणाष्टसिद्धियुक्तो नरः भवति ध्यानमार्गज्ञस्त्रिकालज्ञान संयुतः ३३ दूरश्र
वणकं सोपि करोति कामगां गतिं जले स्थले स्थले तोयमाकाशे नगरादिकं ३४ अहंतां
त्यक्त्वा सर्वत्र भवति परमद्युतिः अपारायुः समायुक्तो ब्रह्माद्यां कालयस्यापि ३५ एकक
स्यास्य सर्वेषां वृत्तांतं कथयस्यपि जानाति सततपोयोगादंत ध्यानपरायणः ३६ सो
पि गत्वा विधेर्लोकं भुंजते विविधान्सुखान् पुण्यांते पुनरत्रैव दिनो भवति निश्चि
तं ३७ न तीयं त्वं तपोरूपं शृणु मत्तो सुयोगदं द्विविधं च तपो येन साधितं गुरुमा
र्गतः ३८ तेनैकाग्रमयं चित्तं भवति नात्र संशयः सर्वत्रात्मस्वरूपं स पश्यति ज्ञान
चक्षुषा ३९ तत्रानुभवमात्रेण ज्ञानदमपरायणः भवति तेन संतापो देहे मनसि
यू॰ जायते ४० विषयान्निंदं सोपि जडोन्मत्तपिशाचवत् चरति सर्वभावज्ञ आत्म २

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

निष्टतयासुत ४१ ततोनिरोधयोगेननिवृत्तिषुपरायणः चित्तंसंरोध्यसर्वत्रनि
यत्न२ वृत्तिर्लभतेस्वयं ४२ अहंब्रह्मेतिप्राक्तंतत्रकुर्वतोभयंभवेत् नतत्रगच्छागदात्मा
वैमत्नोवाणाविहीनतः ४३ नस्वतोस्यानभावश्चपरतोस्यानएवनंनस्वतःपरतस्त
त्रनुस्यानवर्जितंभवेत् ४४ एवंनिरोधयोगेनशमदमपरायणः संतोषेणस्वयंयो
गीवर्ततेनिसदासुत ४५ तत्रसंतोषभावस्यस्थितस्यदेहचेतसोः संतापोज्ञा
पतेनित्यंतदेवत्तपञ्च्यते ४६ ततोनिरोधभूमिंसत्यक्त्वाशांतिपरायणः लब्ध्वा
पंचविधंचित्तमेवंब्रह्मैवजायते ४७ तत्रविधिनिषेधाभ्यांहीनोयोगधरःस्व धा२
यं [redacted] रतिरसहीनोत्रप्रारब्धानुभवेनसः ४८ यथा
जलानिसर्वत्रगच्छंतिसागरेसुत यदृच्छयातथासोपिभोक्ताभोगस्यनिसदा ४९

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तत्रांतरिन्नारीरस्य तापः संज्ञायते सदा ज्ञांत्या योगपरत्वेन तत् देवतपनुच्यते ।
४ ५० एतद्योगात्मकं सुब्रूतपस्ते कथितं मया ततो यं ब्रह्मदं यत्नमाचर ५१ इ
ति श्रीमदांत्ये मौद्गले महापुराणे पंचमखंडे लंबोदरचरित्रे असितनैध्रुवसं
नै०४ वादे त्रिविधतपोवर्णनाम प्रथमोध्यायः १ मुद्गल उवाच० असितस्य वचः
श्रुत्वा नैध्रुवो विस्मितोभवत् प्रणम्य तं महाभागं जगाद विनयान्वितः १ नैध्रु
व उवा० स्वामिन्वद महायोगं योगदं साधनं परं तदर्थं कस्य भक्तिं मे कर्त्तव्या यो
गिसत्तम २ असित उवाच० शृणु पुत्र प्रवक्ष्यामि लंबोदरकथानकं तेन सर्वमहा
योगं लभते नात्र संशयः ३ एकदाहं तथा पुत्र वत्सरस्ते पिता पुरा तपसा युक्त भावे
न भवाब्धेः स्यात्स्व निर्मलो ४ ततो योगस्य प्राप्त्यर्थं यत्नवंतौ सुसंवस्थितौ अंतर्ज्ञौ ४

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नसमायुक्तौ जडोन्मत्तादिसुप्रियौ ५ एकाग्रं साधयित्वा वै निरोधे संस्थितौ तदा।
सहजावस्थयायुक्तौ सुखयुक्तौ भवावहे ६ तत्रैव मोहहीनत्वं दृष्ट्वा परमविस्मितौ गुणा
तिक्षीणौ ततौ जातौ गतौ च ब्रह्मणोन्तिकं ७ तत्र स्पर्द्धासमायुक्तौ विश्वामित्रवसिष्ठको
समायातौ प्रणम्यैनं प्रतिष्ठन्तौ मदान्वितौ ८ क्रोधयुक्तौ विधातारं प्रपृच्छन्तौ विशे
षतः को धिको वद धातस्त्वं तपसा योगसेवया ९ तच्छ्रुत्वा तौ जगाद स्वयम्ब्रह्मा सर्वपि
तामहः येन क्रोधो जितो नूनं तं जानाम्यधिकं मुनी १० एवं क्रोधयुतौ पूर्णौ तत्र
किं विद्यते तेतपः योगं सर्वत्रकर्माणि स्थितं योजयति सोधिकः ११ ततः प्रणम्य
विश्वेशं वदतः स्मतपोधनौ विनयेन समायुक्तौ तपः स्पर्द्धापरायणौ १२ वसिष्ठ
विश्वामित्रावूचतुः कीदृशोर्थं प्रजानाथ क्रोधः सर्वभयंकरः कुत्रैतिदेवे तिष्ठ

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

त्राकिंरूपः किंस्वभाववान् १३ केनयोगेनतंदृष्टुं जयंतियोगिनः प्रभो सर्वमेवद विज्ञान
स्यज्ञपिष्यावोनसंशयः १४ ब्रह्मोवाच० अत्राहंकथयिष्यामीतिहासंसर्वसिद्धिदंतेन
क्रोधंचकामंचाभिमानंतंजयतिप्रभुः १५ त्राकुनेर भवत्पूर्वागत्य भस्मासुरोत्तपाः
सश्रुक्रमुपसंगम्यविद्यांपंचाक्षरींपुरा १६ दीक्षांगृह्यमहादेवमुपासनविधानतःसा
धयामासभावेनभस्मोद्धूलितविग्रहः १७ सहस्रेप्रगतेचैववर्षेपुरांकरःप्रभुःतं
ययौवरदानार्थंसर्वदेवसमावृतः १८ आगंतंशंकरंदृष्टुत्थायप्रणिपत्यतंपूजयित्वा
प्रतुष्टावस्तोत्रैःशैवैर्महासुरः १९ संतुष्टःशंकरोदैत्यंजगादभक्तमुत्तमं वरंवरयदास्ये
हंभक्तयानेनतपसासुर २० भस्मासुरउवा० यस्मिन्मेमहेशानमस्तकेहंधरामिसः हस्ते
सद्योमृतोभूत्वाभवतुभस्मसात्ततः २१ अन्येभ्यःसर्वभूतेभ्योनभयंमेकदाचन

भवेत्सर्वतिगात्राक्लिष्टयाकुरु महेश्वर २२ तच्छ्रुत्वा विस्मितः शंभुर्जगाद तं महासु
रं सर्वं ते च महादैत्य भविष्यति मदाज्ञया २३ शिरसि यस्य ते हस्तो दक्षिणः संपतिष्यति स
प३ वै भस्ममयः सद्यो भविष्यति न संशयः २४ ततः शिवौ यौ स्थानं कैलासं गणसंवृतः दैत्य
स्तत्रैव तिष्ठन्स विचारमकरोत्स्वयं २५ अहो शिवस्य वामांगे संस्थिता जगदंबिका
रूपलावण्यसंयुक्ता रत्नभूतातिसुंदरी २६ एतादृशी मया कुत्र दृष्टा नैव सुरूपिणी न
ग्रतः शंभुरयं तस्यायोग्यो न च भवेद्ध्रुवो २७ अतोहं यत्नमास्थाय वरदानप्रभावतः
शंभुं भस्ममयं कृत्वा गृहिष्यामि च पार्वती २८ एवं विचार्य दैत्येंद्र आययौ शंकरांति
कं कैलासे गिरिवर्ये स वेगमास्थाय दारुणः २९ दक्षिणं हस्तमूर्ध्वं स कृत्वा शंक
रसन्निधौ आययौ तं विलोक्यैव पपाल गिरिजापतिः ३० नमस्कारादि चिन्हैश्च

हीनं दृष्ट्वा स्वसान्निध्यं आसुरभावसंयुक्तं भयभीतं समंततः ३१ ततः सोपि महा
दैत्यः क्रोधयुक्तो विशेषतः तमनुधाव पित्वावेगं हीतुमुद्यतोभवत् ३२ ततोति
वेगमास्थाय शिवः पपाल भीतितः अथावत्स्वरष्टमास्थाय भस्मासुरस्तमेव च ।
३३ पलंतं शंकरं तत्र ददर्श कमलापतिः सस्मार गणपं चित्ते [redacted] किं कुलः ३४ भविष्यति वि८
अथर्वशिरसा सोपि तुष्टाव विघ्ननायकं विष्णुः परमशोकार्तो महादेवस्य कारणा
त् ३५ शिवश्च भयसंयुक्तो गणेशम स्तुवत्स्वयं माहासंकटनाशार्थं शरणा
गतवत्सलं ३६ शिव उ० किं पश्यसि नाथ विनायक त्वं दैत्येन सर्वत्र च मां सु
त्रासितं दक्षभुजेन मस्तकं गं गणेश कृत्वा स मे भस्ममयं करिष्यति ३७ नानाज
नैः सेवितपादपद्मं किं विस्मृतो मां भयभंगकारिन् चिंतामणे चित्तनिवासकर्त्तं

मंरक्षविघ्नराद्दयाघनाभ ३८ त्वदन्यदेवं शरणं गजाननप्रभुं समर्थं न भजामि ना

थ· नकोपि हेरंब महानुभावस्त्वमोहि मां रक्षितुमीश्वरं कदा ३९ लंबोदरामोघन।

सुचिंतनं ते स्वानंदवासिंश्च महोदरस्त्वं रक्षस्वमां मृत्युमुपागतं किलत्वत्पाद नि

ष्ठं भयभंजनाश्रु ४० किंसिद्धिबुद्धिप्रविहारकेन संसक्तजातोसि विनायकत्वं भ

क्तानुकंपी गणपस्यनामवेदेकथं संकथितं महात्मन् ४१ किंलक्षलाभप्रभवा

र्थमेवं संसक्तभावेन चविस्मृतोसि मां रक्षनो चेन्निगमस्य देव व्यर्थं यशः संभवि

तापरात्मन् ४२ यथा दिनेशः समग्रकालमुक्तः प्रकाशदाता भवतीति नित्यं तथा

हि ते भक्तजनानपारान्स्मरस्वतान्त्र[illegible]क्षितुमंतरं कि ४३ किंयोगरूपासि विलंब

केन रक्षस्व भीतं मरणेमु संस्थं हेरंब विघ्नराड् विनायकाश्रु रक्षस्व रक्षस्व महे

त्रपुत्र ४४ एवंसंस्तवजित्रां मौविष्णोर्हृदि गजाननः प्रविश्यबुद्धिसंदातावभु,
वभक्तवत्सलः ४५ धृत्वा स्त्रीवेत्रांकं विष्णुर्ययौत्तं भस्मासुरांकं महासुरःसत्तांदृ
ष्ट्वामुमोहिनीं स्त्रिपं ४६ तां समागम्य दैत्येन्द्रः पप्रच्छ मोहसंयुतः क्व कुत्र गच्छसि
सुश्रोणि किं ते कार्यमुपस्थितं ४७ वद मां तत्करिष्यामि त्वद्दासस्त्वन्तसंशयः अहं
सर्वेष्वरो त्रैवनेमे समंप्रविष्यन्ते ४८ भज मां भावसंयुक्ता भजंतं ते च दासकं त्वद
धीनो भविष्यामि सद्भावरांगतो मतं ४९ तस्य तद्वचनं श्रुत्वा स्मित्वा माता तं जगाद ह
अहं मोहमदा नाम मोहिन्यत्र समागता ५० यदि मद्वाक्यपादेस्य वर्तसे त्वं निरंत
रं तदा तेग्रहयो भूत्वा तिष्ठामि नात्र संशयः ५१ तथेति दैत्यराजस्तां जगाद सा ब्र
वीत्पुनः नृत्यं कुरु मदग्रे त्वं यथाहं नर्तयामि वै ५२ तया दक्षिण हस्तेश्च स्था

पितः शिरसि स्वके सोपि तथा चकार शंभुश्चांतो विघ्नेशमायया ५३ भस्मसात्समभव
द्दैत्यो भस्मासुरश्च तत्क्षणात् ततः शिवा सा विस्मिता भूत्वा तुष्टाव गणनायकं ५४ इ
ति श्रीमदांत्ये मौद्गले महापुराणे पंचमखंडे लंबोदरचरित्रे भस्मासुरवधो नाम
द्वितीयोध्यायः २ ब्रह्मोवाच गाणेशैः स्तोत्रमुख्यैः संतुष्टाव विष्टरश्रवाः गणे
शं सिद्धिदं पूर्णं भक्तेभ्यो भक्तिवत्सलं १ ततः सा मोहिनीरूपं त्यक्त्वा स्वमुद्यतो भव
त् एतस्मिन्नंतरे तत्रामरैः संबोधितः शिवः २ ज्ञात्वा भस्मासुरं नष्टं मुमोद विस्मि
तमानसः ततस्तं भक्तिसंयुक्तो जगाम विष्णुं स्म शंकरः ३ ततः सर्वैः समायुक्तो य
यौ मुकुंदकपर्द तत्र नारीस्वरूपस्थं ददर्श केशवं शिवः ४ महामोहप्रदं रूपं दृ
ष्ट्वा विष्णोः सुविस्मितः ज्ञानं तत्कर्म महादेवस्तत्राययो कामविह्वलः ५ तं दृष्ट्वा मो

ह्नितं विष्णुः पपाल स्त्रीस्वरूपधृक् तामान्वधावद्देवेशः शंकरो विह्वलो भृशं
६ ततस्तत्याज तद्रूपं विष्णुः स पुरुषो भवत् शिवः खिन्नश्च तत्रैव स्खलितो
भूत्सुविह्वलः ७ ततः सर्वे प्रययुर्देवाः स्वस्वस्थानं मुदान्विताः स्तुत्वा[illegible] महाभागं विष्णुं ३
शिवः स्वस्थानगो भवत् ८ शिवस्य वीर्यसंपातात्तद्वीर्ये प्रभवो सुरः बभूव रूपा
मवर्णश्च ताम्रचक्षुः प्रतापवान् ९ स शुक्रमुपसंगम्याबाचतं विनयान्वि
तः प्रणम्य तेजसा युक्तः शिष्यं पालय मां मुने १० ततो ध्यानेन ज्ञात्वा सत्तस्य
सर्वं महामुनिः पुनस्तं प्रजगादैव वचनं हर्षयन्नरं ११ शुक्र उ० मोहिनीरू
करो दृष्ट्वा कामाबाणप्रपीडितः पश्चाद्दिष्टं समालोक्य स्वचित्ते क्रोधमाद
धे १२ मनो मे चंचलं पूर्णं तं हनिष्यामि यत्नतः मनोग्रहणरूपेश्चक्रो

धस्तत्र प्रवर्तते १३ तस्मिन्काले च वीर्यस्य सबलं नं सहसा भवत् तस्माज्ज्ञातो
सि तेन त्वं श्रीकृ० धनामा भविष्यसि १४ ततो द्रावब मुरवेभ्यः [redacted]
[redacted] सकारयामास विप्रपः मौंज्यं तिसर्वे मा३
[redacted] संस्कारान्यथाविधि सनाम्न्वचित् १५ श्रीकृ० धोवेदादिकं सर्वमभ्यस्य गुरुस
न्निधौ गांवरस्य सुतां तुल्यामुपयेमे महासुरः १६ प्रीतिनाम्नीं महद्रूपां स
र्वावयवशालिनीं रूपलावण्यसंयुक्तां विषयापादिह्लादिनीं १७ याः ततः शू
क्रं समागम्य ज्ञानाद्प्रणिपत्य तं कृतांजलिर्महातेजा दैत्येभ्यः सुरव देव चः
१८ श्रीकृ० धासुर उ० ब्रह्मांडविजयं स्वामिन्करिष्यामि त्वदाज्ञया मंत्रं देहि त
दर्थं मे सर्वसंज्ञो विवर्द्धनं १९ ब्रह्मोवाच० तस्य तद्वचनं श्रुत्वा काव्यः सर्वदृ

सत्तमः दैत्यानां प्रहितार्थाय यद् दैत्यस्येमं महामनुं २० सूर्यस्य विधिसंयुक्तं गत्वाप
यौ प्रणम्य तं वनं व्याघ्रादिसंकीर्णं तपसे कृतनिश्चयः २१ एकपादेन तिष्ठन् स
सज्जापमंत्रमुत्तमं ध्यायन्नर्यमणं चित्ते कृ ऊर्ध्वदृष्टिर्महासुरः २२ निराहारो जटे
वेन्द्रं तोषयामास यत्नतः जीतो ग्रमादि भपंत्य त्वक्काष्ठवत्सं संस्थितो भवत् ।
२३ दिव्यवर्षसहस्रेण संतुष्टो भानुरायया वरं दातुं महादैत्यमुवाच घननिः
स्वनः २४ रविरुवाच० वृणु वरान्महाभाग क्रोधयोऽहं ददामि तान् तपसानेन
संतुष्टो मनेप्सितान्महामते २५ श्रुत्वा च दैत्योहृष्टात्पुरतः स्थिते प्रणनाम
रवे३ महाभक्त्या पुपूजे तेजसां निधिं २६ पुनः प्रणम्य तुष्टाव कृत्वाञ्जलिर्महासुरः सौ
रसूक्तेन देवेशं पुनः संनत आदरात् २७ तमुवाचार्यमा दैत्यं वृणु वरमहाम

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ते यं यं मिच्छसि त्वं तं तं ते दास्यामि नान्यसंशयः २८ श्रीघोषसुरउ० कृतत्तिस्थितिसंहा
रयुक्तायेदेवनायक त्वेभ्योमेमरणंभाभेनोनभवेदेव कदाचन २९ ब्रह्मांडजयनेत्रु
कंमांकुरुष्वविशेषतः राज्यं चराचरस्यैवदेहिमेदितिनंदन ३० आरोग्यंमनसा
यद्यच्चिंतितंसफलंभवेत् नमेस्तममभवेत्कुत्रत्वं थाकुरुदिवस्पते ३१ श्रुत्वा
तस्यवचोरम्यंसर्वेभ्योमयदायकं विस्मितस्तज्ञसांनाघोजगादतंस्वयंचित्तः ३२
मानुरुवा० श्रीघलयाचयत्प्रोक्तंतदेवसफलंभवेत् नपूर्णायंत्रिकोदैत्यत्तस्माद्द
त्तंमयापरं ३३ एवमुक्त्वाययौसालोकमगमद्गृहः स्वसंयुतः श्रीघोहर्षसमाविष्टःप्रय
यौस्वगृहंततः ३४ सुहृदोनंदयामासासुरान्सर्वान्महायशाः काव्यंप्रणम्यस्वस्था
नेसंस्थितोभून्मदान्वितः ३५ हर्षशोकश्चपुत्रोस्यैपीत्वामुत्स्यांदैत्यपः नाना य-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१० भोगान्समभुंजानो गर्विततो भूत्ततः परं ३६ भुक्तं सकलनीतिज्ञं समानाप्यप्रपूज्य
तं तस्यानुमतमागृह्य नगरं निर्ममे सुरः ३७ आचैत्रानो मकेरम्यं सर्वतो भास
मन्विते तत्रागमन्स्थ्य विप्रर्षेः दानवा दैत्यराक्षसाः ३८ चातुर्वर्ण्यसमायुक्ता
निवासं चक्रिरे पुरा जना हर्षयुतास्तत्र मुमुदुः ससुहृद्गणाः ३९ ततः कश्यं समा
गत्य क्रोधं चकार विप्रपैः अभिषिक्तं स सर्वेषां दानवानां पदे परं ४० ततः
क्रोधसपत्नस्तु यीप्रधानोः पंच दारुणाः बभूवुः सर्वनीतिज्ञा महामाया महा
महाबलाः ४१ बलिर्जंभस्तथा राहुः स्वर्णो माल्यवानरः ते प्रोक्तः श्रु श्रुमेत्यं
तं क्रोधः परमदारुणः ४२ इति श्रीमदांतेमौकुले० महापुराणे पंचमस्खं
डे लवोदर चरित्रे क्रोधासुरराज्यप्राप्तिवर्णनं नाम तृतीयो ध्यायः ३।

१ अन्य प्रहस्तमुख्याश्च राक्षसा दानवास्तथा॥ भावयुक्ता महाक्रोधं प्रिमेविरेम महाबलाः॥ श्लो॥

ब्रह्मोवाच॰ ततः किंचित्कृते काले क्रोधो हर्षसमन्वितः उवाच बलिमुख्यांश्च दानवा
न्गर्वपूरितः १ क्रोधासुर उ॰ शृणुध्वं दानवाः सर्वे बलिमुख्या महाबलाः ब्रह्मांडं
प्रजापिष्यामि भवद्भिः संयुतोऽप्यहं २ तस्य तद्वचनं श्रुत्वा दैत्याः संहर्षिता नृपं ज
गुस्तं भक्तिसंयुताः कृत्वा करपुटं वचः ३ बल्याद्या ऊचुः सम्यगुक्तं त्वया नाथ जापि
ष्यामः सुराधिपान् त्वत्प्रसादेन दैत्येन्द्र आज्ञापय महासुरान् ४ पराक्रममतुल्यं
तेन तिष्ठति ब्रह्मगोलके निर्भयोऽसि महाराज जयस्व सर्वदेवपान् ५ तेषां व
चनमाकर्ण्य क्रोधासुरः प्रहर्षितः शुक्रं नत्वा समानाप्य तेनानुमोदितो बभौ
६ ततो दैत्यगणान्सर्वानाजुहाव नरैः स्वकैः ते सर्वे हर्षसंयुक्ता आययुस्तं नरा
धिपं ७ ततः सैन्यसमायुक्तो निर्जगाम महासुरः चतुरंगबलैर्युक्तोऽपारैः सर्वत्र

संबभौ ८ रथस्तश्चाव्ययं क्रोधो दैत्यपैः संवृतो बभौ तत्रादौ पृथिवीं जेतुं प
यौ भूमंडले नृपान् ९ बलिमुख्यैर्महावीरैर्यत्र स्थितैश्च मानदैः तैर्युद्धं कः पुमा
न्भूमौ कर्तुं शक्तो भवेत्तदा १० राजानः शरणं जग्मुर्दैत्येंद्रभयपीडिताः केचि
न्मृताश्च तैर्युद्धं कृत्वाहंकारसंयुताः ११ केचिद्राज्यं परित्यज्य वनं ययुः सुदा
रुणं एवं वसुंधरां जित्वा समुद्रं सप्तसागरां १२ शूरांश्च कृताज्ञास्ते दैत्यान्श
रणमागतान् मृतास्तेषां सुतान्सर्वे करदान्स्थापयांचक्रिरे १३ वनेषु येगो
तॄल्लोकेषु पयुर्दैत्यैर्द्रव्यरक्षकाः क्रोधासुरसमायुक्ता जेतुं नागान्महाब
लान् १५ दूतमुखेन वृत्तांतं ज्ञात्वा शेषस्तु दारुधीः वरगर्वसमायुक्तं क्रोध
ज्ञात्वा ययौ स्वयं १६ समागतं महानागं शेषं नागैः समावृतं क्रोधासुरः प्रस
+ स्तेषु दैत्याः संस्थापिताश्च तैः ॥ सर्वत्र नगरेषु वै दैत्याः संस्थापिता बभुः ॥१४॥ ततः पाता

न्तात्मा मान्यंतं सा दूरोऽभवत् १७ करभारं वार्षिकं स स्वीकृत्य नागोपैर्वृतः दत्वा
रत्नादिकं शेषाय ययौ स्वस्थानमेव च १८ ततः स दैत्यपैः सर्वैः शुक्रेण पालितो
ययौ देवस्थानेषु सर्वेषु देवोद्यानान्यभंजयत् १९ ततो दूतं महादैत्यः प्रेषयामा
स हर्षितः स गत्वा मघवंतं च अजगाद चेष्टितं महत् २० ततः इंद्रः स्वदेवैश्च बृहस्पतिसमा
ययौ तेन संज्ञापितः सर्वैः प्रपाल गुहांतरं २१ तद्दृष्ट्वा त्वा दैत्यपैः सर्वैर्हर्षितः क्रोध
कोसुरः आययावमरावत्यां सिंहासनस्थितोऽभवत् २२ देवस्थानानि सर्वाणि वि
भज्य प्रददौ स्वयं असुरेभ्यो महादैत्यस्तेषु दैत्याः स्थिताबभुः २३ नानाभोगान्भुंजा भुं२
नादेव सौख्यकरान्शुभान् नमूनं अन्योन्यस्नेहसंयुक्ता बभूवुः साहसप्रियाः २४
गंधर्वाश्चारणाद्याश्चाप्सरसस्तान्निषेविरे दुःखमुक्ताविख्याताः शेषेणदेवै

ह्रींनाममहामुनी २५ ततः कदाचिद्दैत्येंद्रो दैत्यपैः संवृतो ययौ सत्यलोकं सुविख्या
तं ज्ञात्वा ब्रह्मा पपालह २६ तत्रैव संस्थितो दैत्यः क्रोधः परमदारुणः बुभुजे सत्य
लोकोत्थान्भोगान्दैत्यैर्महाबलैः ततो विकुंठमेवं सजगामासुरसंवृतः १ ज्ञात्वा
तत्रस्थितो विष्णुः पपाल क्रोधभीतितः २८ तत्रस्थित्वा विकुंठस्थभोगान्वि
ष्णुकृतान्स्वयं बुभुजे ज्ञातिभिः सार्द्धं क्रोधभीतितः परमदारुणः २९ ततः
कैलासकं दैत्यः शंकरं जेतुमाययौ महादेवः पपालेव क्रोधसंतापतापितः
३० तत्रस्थः क्रोधको दैत्यो ननंद ह्रदि चाद्भुतं दैत्यैः समावृतः क्रूरस्तान्
जगाद बलान्वितः ३१ क्रोधासुर उ० बलेरावणमुख्याश्च श्यणुध्वंमेव चोहि
तं अधुनात जितं स्थानं वदत तं जयाम्यहं ३२ दैत्येंद्रा ऊचुः सर्वे जितं त्वया स

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जनभानुरेकः सुराधिपः नत्विलः सततं धौम्यं प्रपतत्स्वामुनारा धिप ३३ ततस्ता
नक्रोधको दैत्यो जगादहर्षसंयुतः दृष्टदेवं महीपं नं भानुं त्यजन्तदैत्यपाः ३४ तस्यत
द्वचनं श्रुत्वा क्षोभयुक्तो महासुराः जगुस्तं मायया युक्ताः क्रोधं मेदपरायणाः ३५ अ
स्माकमिष्टदेवोयं मर्त्यैः स्वामीनसंशयः भविष्यामो विशेषेणतं सदा भक्तिलाल
सं ३६ देवानां पक्षमुत्सृज्यास्माकं हितं यदीच्छसि तदावयं घोरमाना ध्यनान्यथा
जपत्तं बलात् ३७ परपक्षाश्रितं देवमस्मान्संहननेरतं भविष्यामो न तं राजन्नतो
हितं समाचर ३८ दैत्येन्द्रानो वचः श्रुत्वा क्रोधः संहर्षितोभवत् दूतं संप्रेषयामास
रावणं गर्वसंयुतं ३९ रावणात्सर्ववृत्तांतं ज्ञात्वा भानुः प्रतापवान् तमुवाच तदा क्रुद्धो
भयभीतश्च मानदौ ४० रविरु० देवानां पक्षमुत्सृज्य क्रोधासुरपरायणः नभवि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ष्यामि भो दूत देवोऽहं नात्र संशयः ४१ इत्युक्तं वरसंयुक्तं क्रोधं वद महामते त्यक्त्वा
राज्यं वने भानुर्गत्वा राज्यं कुरुष्व च ४२ एवमुक्त्वा रावणं स सूर्यः सर्वसमन्वितः प
पाल लोकमुत्सृज्य रावणस्तो समामयौ ४३ ततो निहिंसितो दैत्यः क्रोधो दृष्टैः समा
वृतः आययौ सौरलोकं तं मुमुदे प्राप्य दुर्जनः ४४ आत्मानं कृतकृत्यं स मान
यामास दुर्मतिः ब्रह्मांडविजयी भूत्वा भोगांश्च बुभुजे परान् ४५ ततस्तु पुसदै
त्येंद्रान्स्थाप्य स्वर्गेषु दैत्यपः पृथिव्यां नगरं श्रेष्ठं मायया प्रीतिसंज्ञकं ४६
तत्रस्थः प्रजानां शास्ता क्रोधासुरः प्रतापवान् त्रैलोक्यं भोगसंयुक्तः सुख
दानंददायकः ४७ स्त्री मांसमदिरासक्तो वभूव विषयप्रियः न बुबोध गतं
कालं कालेन वंचितो यथा ४८ इति श्रीमन्मौद्गले महापुराणे पंचमखं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

उ॰ लं॰ क्रोधासुरवधोखंडविजयो नाम चतुर्थोध्यायः ४ ब्रह्मोवाच ततोतिमद
संयुक्तः क्रोधासुरः प्रतापवान् दैत्यानानाप्यत क्रूरान्कर्मणः खंडनायतान् १
तस्मात्तपापयुर्दैत्या यत्रतत्र महीतले ब्राह्मणांस्ताडयामासुर्वर्णाश्रमप्रवर्तकान्
स्व॰८ २ अन्यावर्णाश्च धागस्थकर्महीनांश्च क्रिरे देवतीर्थादिकं दैत्याश्च भुं भग्न्यर्यत्नवृ
क्षकान् ३ सर्वत्रत्रासितालोकाः कर्महीनाश्च भूविरे नस्वाहा न स्वधा कुत्र न वष
ट्कारश्च वच ४ ततो विप्राब्रुवाचाथ क्रोधासुरः प्रतापवान् मदीयनामसंयु
क्तं कर्मकुर्वंतु विप्रपाः ५ ज्ञागदीशो महाभागा अहं द्विजा नसंशयः भक्तानां पादयो
र्मनोदुर्लभं किं भविष्यति ६ ततो द्विजालयोनिष्कागत्त्वाव निष्ठमान द्वौ त्यक्त्वा वि
षयजं सौख्यं सिंहव्याघ्रयुतेषुवे ७ केचिद्दृष्ट्वा स्तदा तापां संस्थितादुःखसंयु

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ताः वर्णाश्रमविहीनाश्च जनाः सर्वे बभूविरे ८ सर्वत्रैकोधकस्यैव प्रतिमा स्थापि
ता भवन् गेहे गेहे च ध्यानस्य पूजा प्रवर्तिता सुरैः ९ एवं महाकृतं सर्वं त्रैलोकं ते
न वैरिणा देवाः सर्वभयोद्विग्नाश्च बभूवुः कर्मखंडनात् १० कर्मखंडनमात्रेणोपा
षणसंयुतामराः ततस्तस्य विनाशार्थं यत्नवंतो बभूविरे ११ न प्रापुस्तस्य नाशांस्तथा
मुपायं ते सुरेश्वराः ततो निर्वेदसंयुक्ता बभूवुः स्वामकंपिताः १२ एतस्मिन्नंतरे तत्र
वसिष्ठो योगिनां वरः जगाद तान्सुरेशानान्नीतिः स्वस्य हितकारकः १३ देवाक्रतुः
तस्य निस्थितिसंहारमुक्तावयं न तत्र्यः अस्मभ्यो मरणं तस्य न भविष्यति तिता-
श्रितं १४ वसिष्ठ उवाच स्वानंदवासकारिणं गणेशं ब्रह्मनायकं त्रिभिर्हीनं ज
गवेदास्तं सेवध्वं सुरेश्वराः १५ हत्वा क्रोधासुरं सोपि स्वपदानि प्रदास्यति अस्म

भेदो नात्र संदेहः कुर्वंतु प्रयत्नाः सुराः १६ वसिष्ठवचनं श्रुत्वा हर्षयुक्ताः सुरर्षयः सा
साधु२ धुं मुनिं सर्वे ज्ञानगम्यं ज्ञाननिधिं परं १७ ततस्ते मंत्रराजं वै जेपुर्लंबोदरस्य च भक्ति
युक्तास्तपोनिष्ठा ध्यानसंस्था बभूविरे १८ नानानुष्ठानयोगैश्च तोषयंतो गजा
ननं उपोषणपराः सर्वे विधियुक्ता महामुनी १९ एवं वर्षसहस्रे च गते पुत्रो
पसंयुतः लंबोदरः प्रसन्नात्मा नानायोवरदायकः २० समागतं गणेशानं दृष्ट्वा
देवर्षयः पुरः भुत्वा महहर्षसंयुक्ताः प्रणेमुर्दंडवद्भुवि २१ पुपूजुर्भक्तिसंयुक्ता
[illegible] नानोपचारकैः प्रणम्य संस्थिता स्तुवुः करसंपुटाः २२ देवर्षय ऊचुः नमस्ते
गणनाथाय लंबोदरधराय च गजवक्त्राय सर्वेषां पूज्याय ते नमो नमः २३ स्वा
प्रभुं॥पुनः२ नंदपतये तुभ्यं सर्वस्वानंददायिने अनाथाय च सर्वेषां नायकाय नमो न

मः २४ नमो विघ्नेश्वरायैव भक्तविघ्नविनाशिने अभक्तानां महाविघ्नकार
कायनमोनमः २५ उत्पत्तिस्थितिसंहारहीनाय सर्वरूपिणे अनौपम्ये परेशाय द२
महोदर नमोस्तुते २६ मापितामोहकायैव मायाविने परमात्मने सर्वसिद्धिप्रदा
यैव नानाविद्याकलात्मने २७ अपारानन्तरूपायापारहस्तपदाय च गुणेशाय
गुणानांते चालकाय नमोनमः २८ आदिमध्यान्तरूपायादिमध्यान्तस्वरूपि
णे अनाकारायसाकारयुक्तकायतेनमोनमः २९ ज्येष्ठराजायज्येष्ठानांपतयेस
र्वेदृपिने आदिपूज्याय चान्तेते संस्थिताय नमोनमः ३० नानाविधं जगत्सर्वं
ब्रह्मनानाविधंप्रभो संभूतमुदरात्ते वैतेन लंबोदरो भवान् ३१ त्वदुद
रभवाः सर्वे त्वं न कस्योदरोद्भवस्ते नैवोदरोपि वै लंबोदरा नमोस्तुते ३२। १५

सर्वेषामुदराणां त्वं पारं ज्ञानासि विघ्नप तदुरस्य न कस्तेपि पारं ज्ञानाति ते
नमः ३३ एतां दृष्ट्वा प्रमानंदानामानंदप्रदापकः प्रत्यक्षं हृष्टिगो ज्ञातो स्माकं ध
न्याव यं ततः ३४ मनोवाणी विहीनो न मे नो वाणीमयो न च लंबोदरः समायान
आश्चिर्यं भाति ते नमः ३५ किं स्तवामो गणेशानं तं पश्च वेदादयः प्रभो श्रांतिं
प्रापाश्च यं तत्र नमो नमः प्रसीद नः ३६ एवमुक्त्वा सुराः सर्वे ननृतुर्मुनयस्तथा
तानुवाच गणेशानो मेघगंभीरनिस्वनः ३७ लंबोदर उवाच। वरं ब्रूत महाभा
गा देवं द्रामुनयो मलाः तपसा मनसा भीष्टं भक्त्या तुष्टो ददाम्यहं ३८ भवत्कृतं
मदीयं यस्तोत्रं सर्वप्रदं भवेत् पठते शृण्वते चेहामुत्र सुखप्रदं परं ३९ यं
यमिच्छति तं तं वै दास्यामि स्तोत्रपाठतः नानासिद्धिप्रदं चास्तु मम भक्तिविवर्द्धं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

नं ४० ब्रह्मोवाच लंबोदरवचः श्रुत्वा तुष्टा देवा हर्षयो भवन् जगुस्तं प्रणिपत्यैव
सर्वज्ञं भक्तपालकं ४१ देवर्षय ऊचुः यदि प्रसन्नो भावेन वरदोसि गजानन त
दाक्रोधासुरं नाथ मारय स्वाधुना प्रभो ४२ अतो लंबोदर स्वामिंस्त्वदुदरसम
द्भवान् एकं हत्वा तथा सर्वान् रक्ष स्वभक्तिकान् प्रभो ४३ स्थानभ्रष्टा वयं ते
न कृताः कर्मविहीनकाः ऋषयश्च जगत्सर्वं स्वधास्वाहाविवर्जितं ४४ भक्तिं
देहि त्वदीयां नः सर्वक्रोधविनाशिनीं तया युक्तां तिसमायुक्ता भजिष्यामो विशे
षतः ४५ तव भक्तिर्यदा प्राप्ता लंबोदर तदा स्मभं भुनक्ति सर्वदा स्वामिन् ब्रह्म
भूताः सर्वे समताः ४६ देवानां मुनीनां सर्वेषां श्रुत्वा वचो महाप्रभुः लंबोदरस्तथा
नु प्राह तत्पत्ति भक्तियंत्रितः ४७ ततः सोंतर्हितो देवो देवास्तत्रैव संस्थिताः मु

नपश्च भयोद्विग्नाः कात्याकां स्तांप्रचक्रिरे ४२ इति श्रीमदात्येमोक्तले० पञ्ले
देवर्षिवरप्रदोनाम पंचमोध्यायः ५ ब्रह्मोवाच० विश्वामित्रवशिष्ठौ च शृणुतंप
रमाद्भुतं चरितं गणनाथस्य महाशांतिप्रदायकं १ कदाचित्क्रोधकेदैत्यः स
मासन्नगतो भवत् तत्राकन्या भवांबा णीं श्रुत्वा वभयप्रदायिनीं २ देवैश्च मुनिभिः
सार्द्धं लंबोदरो वधायते प्रार्थितः सत्तु हत्वा त्वां जगत्सुखी करिष्यति ३ तच्छ्रु
त्वा मुर्च्छितं क्रोधं सहसा भयविह्वलं तं दैत्यं द्रष्ट्वा विप्रर्षीसा वधानं प्रचक्रि
रे ४ नोवच युक्ता विनिपोषेण पप्रच्छुस्तं महासुरः चल्पाद्या भयभीतायै किं जातं
वदमानद ५ दैत्येन्द्राणां वचः श्रुत्वा भ[illegible]कोमहासुरः जगादतान्सवृत्तां ययु२
न माकोत्राघात्कसमुद्भवं ६ तच्छ्रुत्वा कुपितादैत्या स्तत्समूचुर्मदसंयुताः देवा

मुनिगणास्त्वा यह हनिष्यामो विनिश्चितं ७ अस्माकं शत्रुभिर्देवैस्तैः कृतं दा
रुणं महत् आज्ञापय महाभाग सर्वान्देवाञ्जिघांसया ८ ततो निहर्षितः क्रोधः
स्वयं युद्धाय सज्जितः दैत्यैर्वै संवृतः सद्यो ययौ शैलेन्द्रमुख्यकं ९ समागतं महा
क्रोधं दैत्यगणैः संवृतं ततः देवाः सर्वे भयोद्विग्नाः सस्मरुर्गणनायकं १० तेषां स्मर
णमात्रेण लम्बोदरः प्रतापवान् मूषकारूढ एवासावागतो मुनिसत्तम प्रभुः।
११ पाशाङ्कुशधरस्तं समुत्कं सिद्धिबुद्धिसमन्वितं नाभिशेषं त्रिनेत्रं तं ददृ
शुश्च सुरर्षयः १२ ततस्तं ते प्रणेमुः सर्वे भयं त्यक्त्वा सुहर्षिताः स्तुत्वा वृत्तान्तम
यं तं कथयामासुरादृताः १३ श्रुत्वा वृत्तान्तमग्रे स गजाननः सुराधिपान् लम्बो
दरः प्रसन्नात्मा मुनीन्क्रोधयुतः प्रभुः १४ मा भयं कुरुत प्राज्ञा हनिष्यामि म

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ह्यासुरं स्वधर्मस्थानजनान्सर्वान्कारिष्यामि न संशयः १५ ततः क्रोधासुरस्तत्र
समीपे समुपागतः दृष्ट्वा लंबोदरं देवं भयभीतो बभूव ह १६ उवाच दैत्यपांस्तत्र
सत्यावाक्सान संशयः अयं लंबोदरो नूनं दैवैः संप्रार्थ्यते सुरः १७ तस्य तद्वचनं
श्रुत्वा दैत्याः क्रोधारुणेक्षणाः ऊचुस्तं दैत्यनाथं ते गर्वयुक्ता बलान्विताः १८
दैत्यनाथमूचुः लंबोदरं सुतान्देवान्हनिष्यामो न संशयः मा कुरुष्व वृथा चिं
तां त्वं पृष्ठे महामते १९ देहधारी गणाध्यक्ष आगतो नात्र संशयः तु मिति
नानावानदेहः किं करिष्यति मे प्रभुं २० कार्यं दैत्यगणा हत्वा त्र समस्मरुर्मति
संयुताः तेषां स्मरणमात्रेण मुनीन्द्रो आगतो भवत् २१ तं प्रणम्य गुरुं दैत्याद्व
तांतं सर्वमंत्रसा अकथयं श्च ततं श्रुत्वा श्चक्रस्तान्प्रत्युवाह च २२ श्रुक्र उ०

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

+परित्यज्यासिद्धिमिच्छन्तिदुर्मतिः॥ बुद्धिपतिं

मौ०पु० सिद्धिपतिंन त्यात्वाक्का स्फूर्तिमिच्छन्तिमूर्खवत् २३ विघ्नराजं सदैकंयं तं त्यज्य खं०५
१८ विघ्नहीनकाः कथं भवंति दैत्येंद्रा वद तन्मां विनिश्चयात् २४ अतो युद्धं परित्य
ज्य शरणं तस्य शोभनं भविष्यति न संदेहो वै चैको धाममरिष्यति २५ शुक्रस्य वच नो३
नं श्रुत्वा बलिस्तत्र जगाद तं कर्मणा सिद्धिदाता यं स्फूर्तिदाता भवत्यहो २६
कर्मणां विघ्नहीनत्वं निर्विघ्नं प्रकरोति च अतो वयं महायोगिन् कर्मणां तं जया
महे २७ तस्य तद्वचनं श्रुत्वा सर्वे दैत्येंद्रकादयः साधुध्वैवं स्तत्र संध्यामायो। सा४
द्यता बभुः २८ ततो भाविबलं वीक्ष्य काव्यस्तत्र मुनीश्वरो मूर्छीभावं समा।
धृत्य संस्थितो भूत्स योगवित् देवाः सर्वे महाख्येस्तानुयुताः केचसमन्विताः
आयपुरणभूमिं च दैत्येन्द्रा देवपान्ययुः ३० ततः परस्परं युद्धमभूवद्दारुणम १८

ह न दैत्यानां चैव देवानां परस्परं विनाशनं ३१ मरणे निश्चयं कृत्वा देवा दैत्या
युयुधिरे शंखानां दिग्नोनादयुतास्ततः शस्त्रास्त्रैर्बलगर्वेण प्रेरिता रणे सं दु२
दाः ३२ वीराणामभवन्नादैर्वाजित्राणं चवाजिनां बृंहितानां च शंखानां दिग्नो
नादयुतास्ततः ३३ सैन्यपादभवो रेणुश्छादयामास भास्करं नाभूत्स्वपरबोध
पितत्र युद्धे च परस्परं ३४ ततो रक्तप्रभावश्च संभूतः शस्त्रघाततः तेनारक्तकणाः
सर्वे मज्जिता अभवन्मृधे ३५ ततः परस्परं द्वन्द्वयुद्धे क्रोधसंयुताः देवाश्च
दानवा नद्धाः परस्परजयेपरताः ३६ दिनत्रयमभूद्युद्धं घोरं सर्वभयावहं ततो दैत्य दं३
गणाः सर्वे पपलुस्त्राससंयुताः ३७ देवा हर्षयुतास्ते च जयपलं वादरमभो नें चुस्ता
न हंतु मायातो दैत्येन्द्राः क्रोधसंयुताः ३८ बलिश्च रावणो जंभो मारुत्यवाबुंभ

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कर्णकः राहुश्चान्ये महावीराः संख्यातुं कैः प्रशक्यते ३९ तैः शस्त्रनिचयैः वीः संहत्तापप
लुस्तदा छित्वासंग्रामभूमिं तेछिन्नभिन्नासमंततः ४० तत इंद्रश्च संक्रुद्धः शंकरो वि
विष्णुरेव च सूर्यचंद्रस्पदेवेंद्रा आपयुः क्रोधसंयुताः ४१ तैश्चक्रा णां महावृष्टिः कृता
परमदारुणा तया दैत्यगणाः सर्वे पपलुश्च दिशोदश ४२ ततोतिक्रोधसंयुक्ताः रावणा
द्याः समाययुः द्वंद्वयुद्धमभूत् घोरं सर्वेषां भयदायकं ४३ जंभोप्यपोमहेंद्रेण राहुः सूर्य
ण संयुगे बलिश्च विष्णुना क्रुद्धो रावणः शंकरेण च ४४ कुंभकर्णश्च चंद्रेण नादैत्ये
द्रकादयः देवेंद्रैर्वासुमरुभिश्च युयुधुर्जयकांक्षिणः ४५ इति श्रीमदाद्ये मौद्गले०पं०
लं० देवासुरयुद्धवर्णनंनामषष्ठो० ६ ब्रह्मोवाच० एकरात्रं महाघोरं युद्धं बभूवदा
 रुणं ततो रक्तप्रवाहैश्च नद्यो जाता जलौघवत् १ अजयः प्राप्यते देवैर्नासुरैर्य

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मसन्निभैः मघवा वज्रपातैस्तां मूर्छयामास दानवान् २ ततो जंभोतिसंक्रुद्धो गदा
मादाय दारुणां युयुधे देवराजेन महाबलपराक्रमः ३ गदया देवराजोसंमूर्छितः प्रच
काशह ततो हाहाकृतं सर्वं देवसैन्यं पपालतत् ४ इंद्रसंज्ञा समायुक्तः पुनः संयुयुधे
भृशं वज्रेणैव पा तयामास जंभं तं धरणीतले ५ त्रिशूलेन हतस्तत्र रावणः पतितो
भुवि शंकरेण ततः सर्वे पपलुर्देवादैमृधे ६ गदया विष्णुना तत्र बलिः संमूर्छितः॥
कृतः कुंभकर्णश्च चंद्रेणापीडितो मूर्छितो भवत् ७ राहुः सूर्येण संग्रामे तेजसापी॥
डितो भृशं पपात मूर्छया भूमौ हाहाकृत्वा महामुनी ८ द्वंद्वयुद्धं परेषेयेत्वा कुर्वन्न
मरैर्बलात् तेन सर्वं च दैवेंद्रैः पीडिताः सर्वे पलायिताः ९ भक्तवात्सल्यभावेन शंकरो
विष्णुं जगामाशु वनं च बलिं तत्र चचक्रतुर्न मृतं मृधे १० ततो तिकोपसंयुक्तो देवेंद्रो

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शास्त्रवृष्टिभिः असुरान्मारयामासुः सर्वंच भयसंयुतान् ११ प्रलयंमेनिरंत
च दैत्यास्त्रासमाकुलाः देवानां शरणं जग्मुः कोचित्त्राणपरिप्सया १२ जयंत्वं
वोदरश्चास्वामिन् जयविघ्नेशदेवपाः हेरंब वक्रतुंड श्च इत्येत्युचुः प्रहर्षिताः।
१३ दैत्यानां क्रंदनं दृष्ट्वा कोपः परमविस्मितः निःसत्त्व चिंतयामास कोबभूव किं
भविष्यति १४ पितुः शोकं विदित्वातो हर्षः शोकश्च संयुगे पपतुः शस्त्रवर्षेण व
वर्षतुर्घनो यथा १५ तयोरमोघरूपेश्च शस्त्रैर्देवाहतान्मृधे छिन्नांगाः पप
लुश्च दैत्यसंघाश्च सितापिताः १६ इंद्रं च सहसागत्य शोकः परमदारुणः गतश्च याम्
निंतं सघश्चकार[illegible]मूर्छितो निलः १७ तं गृत्वा स्वबले सोपि स्थापयामास देवपं त
तः श्चक्रेण दैत्येंद्रा विद्धपाणिरुजाः कृताः १८ बलिमुख्याश्च संग्रामं ययुः पुन

महामुनी चक्रेण सहसा हर्षं दृष्ट्वा दृढं च चक्रे सुमूर्छितं १९ ततः कोपसमायुक्तः शंकरो
युयुधे भृशं त्रिशूलेन महादैत्यान् जघान सकलान् प्रभुः २० शंकरस्य बलं वी
क्ष्य हर्षस्तत्र समाययौ युयुधे तेन दैत्येंद्रः पुनस्तेन शिवेनांबरः २१ नानाविधं महा
घोरं युद्धं बभूव दारुणं हर्षस्य शंकरस्यैव परस्परजयैषिणोः २२ ततः स्त्रिशूलघा
तेन शंकरस्तं जघान ह पतितं मूर्छितं हर्षं दृष्ट्वा दैत्या भयातुराः २३ पपात दैत्यपा
न्दृष्ट्वा काव्यस्तत्र समागतः हर्षं मूर्छाविहीनं वै चकार स्वेन तेजसा २४ ततो हर्षस
मायुक्तो दैत्येंद्रो युयुधे भूयः शंकरं विसृष्टस्तपोबलं वीक्ष्य चक्रं मुमोच दारुणं २५ चक्रे
ण सुर घोरेण हतास्ते दैवा अनेकशः पपलुर्भयसंयुक्ता छिन्नभिन्नांगका
मृधे २६ ततः शौनकः समायातः शूलं मुमोच तेजसा आगत्य सहसावेक्ष्यो र्द्ददिप

पातविमर्षो २७ ततः स मूर्छितस्तत्र पपात च जनार्दनः दैत्याः हर्षयुताः सर्वे नादं च
क्रुर्महारणे २८ ततो घोरं हेमहाक्रोधाद्रूढमा मृत्युकल्पया चकार तां करं तत्र पति
तेन मूर्छया भृशं २९ ततो हाहारवं कृत्वा देवाः सर्वे पराजिताः पपलुः सर्वदेवेन्द्रादै
त्याभ्यां चाभिताडिता न ३० ततस्तद्दृष्ट्वा परमाश्चर्यं लंबोदरः प्रतापवान् अंकु
शं क्रोधसंयुक्तो मुमोच दैत्यमंडले ३१ तेजोरूपं महास्त्रं तद्दृष्ट्वा दैत्या विसिस्मिरे
यावत्तावच्च दैत्येन्द्रौ हतौ हर्षश्च नारकः ३२ मायया गणनाथोऽपि प्रभुश्चक्रे गतव्यग्र
हां तदा रेचिक्षेप ततः सर्वे पपलुस्तद्गुमुख्यकाः ३३ ततो विकोपसंयुक्तः क्रोध
स्वयमुपागतः पुत्रं शोकं हरामूर्च्छयाव्याप्य वृष्टिं चकार ह ३४ तद्बाणेरपि तत्रस्था
देवाः सर्वे महामुनी छिन्नांगाः पपलुः सद्यो हाहाकारं वादिनः ३५ तावत्समा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ध्यास्यदेवेशो लंबोदरः प्रतापवान् आययौ रनै भुमिंस पाशांकुशासिधारकः २६
इति श्रीमदांत्ये मौद्गले॰ पं॰ लंबोदर॰ क्रोधासुर समागमो नाम सप्तमोऽध्यायः ७
ब्रह्मोवाच लंबोदरं महादैत्यः समालोक्य रणांते उन्मादक्रोधसंयुक्तः क्रोधः स ग ३
वैविचारवित् क्रो॰धासुर॰ लंबोदरं महामूर्खं किमर्थं रणमागतः देवानां हितमत्र कि ४
न्त्वं न्मरिष्यसि च मे गतः २ येन ब्रह्मांडुगं पूर्णं जितं देवादयः कृताः पश्यतुल्याव
ने संस्थाड्ढेत्तु मिष्ठसि तं मृधा ३ मम क्रोधोदहेत्सर्वं त्रैलोक्यं सचराचरं तत्पुरः
कथमायातः संग्रामाय सुयंत्रितः ४ त्वया मदीयकं सैन्यं हतं पुत्रौ हतौ तत पा अ
धुनाशोकसंयुतो हं निष्यामि मदान्वितः ५ शरणं याहि मेन्नो चेन्मरिष्यसि गज
जानन उदरं स्फोरपिष्यामि बाणैनैकैर्नत्ते महत्त ६ इत्यादिविविधैर्वाक्यै

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

लंबोदरं महासुरः भक्त्या मामसत्तं देवो जगाद मदसंयुतं ७ लंबोदर उ॰ किं मां वद
सि दैत्येंद्र हनिष्यामि महाखलं त्वां धर्मस्य विहंतारं स्वधर्मस्थापको त्यहं ८ सूर्य
दत्ता दुराचरदुष्टं च कर्मरतो भवान् अतिपापेन तत्सर्वं [illegible] निष्फलं त्वेव भूवह ९
उत्पत्तिनाशयुक्तो सौ मरणं नैव तो भवान् नाहं ज्ञातो न दैत्येंद्र मरिष्यामि कदा
न च न १० ब्रह्मभूतं च मां विद्धि सदा स्वानंदवासिनं कथं जानासि दुष्ट मनो
वाणीविवर्जितं ११ तस्येतद्वचनं श्रुत्वा लंबोदरस्य धीमतः उवाच विस्मितो
भूत्वा तं पुनर्दैत्यनायकः १२ क्रोधासुर उ॰ न ज्ञातो सि यदा ब्रह्मन् कथं
देहधरो सि वै मनोवाणीविहीनश्चेत्कथं पश्यामि मां वद १३ लंबोदर उवाच
इयं मदीयवामांगे सिद्धिर्भ्रांतिस्वरूपिका सिद्ध्यर्थं सर्वलोका भ्रमंति भ्रांति

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

संपुतः १४ दक्षिणांगेस्वयंबुद्धिः संस्थिता भ्रांतिधारिणी बुंध्याबुध्य पुनस्ता
त्र भ्रांतो भवतिमानवः १५ चित्तरूपास्वयंबुद्धिः पंचधापरिकीर्तिता पंचभ्रांतिमपि
सिद्धिस्तयोः पतिरहं किल १६ नानाविध्यं महादेव नानाव्यसनधासदा मदीयोदर
गं विद्धि तेनलंबोदरः स्मृतः १७ ममोदरात्सगुण [illegible] नंतमयासंपालितं तथा अंतेकुद
रंगं कृत्वा क्रीडयामिनिरंतरं १८ अतोमे शरणं गच्छ जीवितुं यदि वांछसि युक्तो मां
वेत्तितेनत्वं बोधितोपि न बुध्यसे १९ नाहं दैत्यवधाकांक्षी नचादेववधप्रियः स्वस
धर्मयुतान्सर्वान्पालयामि न संशयः २० पाताले दैत्यपाः सर्वे न शंभुर्मो मुरादिवि
संस्थिताश्चाहं दैत्यस्थानं दस्थोभवामि च २१ देवाः क्रोधसमाविष्टाः सुदैत्या
न्विज्ञोषतः पातालस्थोस्तसोहं वेदैत्येभ्यः सिद्धिदोभवं २२ पुनस्तपोयुतादैत्या

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

जित्वा देवान्महाबलान् कर्मखंडनभावेन हंतुमिच्छां प्रचक्रिरे २३ तदाहं दे
वसंघेभ्यः सिद्धिदाताभवं पुरा तेनच्छिद्रं ज्ञात्वा देवा जघ्नुः सर्वान्सुरान्पुनः २४ त्वया
सर्वं जितं दैत्य देवमूलनिकृंतनः भवसि तेन सर्वं द्रस्त्वां हनिष्यामि [illegible] निश्चितं २५
तस्य तद्वचनं रम्यं श्रुत्वा क्रोधासुरः पुनः विस्मितस्तं ज्ञात्वा देवं हर्षनिर्भरमानसः
२६ क्रोधासुर उवाच ० नमामि त्वां गणाध्यक्ष सुरासुरमयं परं अधुना भक्तिसंयुक्तं यं५
पालयस्व शरण्यद २७ दर्शयस्वात्मरूपं मे सर्वसंज्ञायनाज्ञानं लंबोदरार्थसंयुक्तं
ब्रह्माकारं गजाननं २८ तस्य वाक्यं समाकर्ण्य लंबोदरः सुहर्षितः भक्तियुक्तमन
सस्तस्मै आत्मरूपमदर्शयत् २९ ज्ञानचक्षुश्च संदत्तं दैत्याय तेन तं पुनः लंबोदरं म
हाक्रोधोपरमपरमविस्मितः ३० ब्रह्मेशं प्रणनाम धर्मसरोमांचो महासुरः लंबो

[illegible]महाक्रोधोपकरणमामसि[illegible] दरः पुनस्तत्र पूर्वरूपो बभूव ह ३१ ततः क्रो
धासुरस्तं वै पुपुजे भक्तिसंयुतः नत्वानुष्ठाव मेलदृष्टः साश्रुनेत्रः प्रतापवान् ३२
क्रोधासुर उवाच० लंबोदर नमस्तुभ्यं शान्तियोगस्वरूपिणे सर्वशांतिप्रदात्रे ते
विघ्नेशायनमोनमः ३३ असंप्रज्ञातरूपेयं शुंडा ते नात्र संशयः संप्रज्ञातमयो
देह५ देहस्ते धारिणे नमो नमः ३४ स्वानंदयोगिभिर्नित्यं दृष्टस्त्वं ब्रह्मनायकः तेन स्वानं
दवासीर्त्वं संयोगधारिणे नमः ३५ त्वदुदरात्समुत्पन्नं जगन्नानाविधं प्रभो ब्र
ह्मांतद्ध्न्स्तसंदेहोलंबोदर नमोस्तु ते ३६ त्वदीयकृपयादेव मयाज्ञातं महोदर त्व
तः परतरं नास्तिपरेशायनमोनमः ३७ हेरंबायनमस्तुभ्यं विघ्नहर्त्रे कृपालवे।
अदिमध्यांतहीनायतन्मयायनमोनमः सिद्धिबुद्धिविहारः तु सिद्धिबुद्धिपतेन

द्वि२

मः सिद्धिबुद्धिप्रदात्रे ते वक्रतुंडाय वै नमः ३९ सर्वात्मकाय सर्वादिपूज्याय ते नमो
नमः सर्वपूज्याय वै तुभ्यं भक्तसंरक्षकाय च ४० स्वतोत्थानात्मकं ब्रह्म परतोत्था
न धारकं तयोदरात्समुत्पन्नं तं किं स्तौमि परात्पर ४१ अतः प्रसीद च विघ्नेश
दासोहं ते गजानन लंबोदराय ते नित्यं नमो नमो महात्मने ४२ इति स्तुत्वा म
हादैत्यः प्रणनाम गजाननं तमुवाच गणाध्यक्षो भक्तं भक्तजनप्रियः ४३
लंबोदर उ० वरं वृणु महाभाग क्रोधासुर मनेप्सितं दास्यामि भक्तिभावेन स्तो
त्रेण तोषितोस्म्यहं ४४ त्वया कृतमिदं स्तोत्रं सर्वसिद्धिप्रदं भवेत् यः पठि
ष्यति तस्यैव क्रोधजं न भयं भवेत् ४५ शृणुयात्तस्य तद्दुःखं भविष्यति न
संशयः यं यमिच्छति तं तं वै दास्यामि स्तोत्रपाठतः ४६ क्रोधासुर उ० यदि ले

बोदरत्वंमेप्रसन्नोवरदोसिमे। तदातेपादपद्मेचभक्तिंदेहिदृढांप्रभो ४७ आज्ञां
कुरुमहाभागसेवार्थंतत्करोम्यहं स्थानंवृत्तिंचमेदेहिपोषणकारिणीं ४८। ६६२
ब्रह्मोवाच० क्रोधासुरस्यवाक्यंतच्छ्रुत्वाहर्षसमन्वितः लंबोदरःपुनस्तंसज
गाद्दैत्यनायकं ४९ लंबोदरउवाच० मदीयासुदृढाभक्तिः संभविष्यतितेनघ।
वसत्वंमयहीनश्चस्थानेतेनात्रसंशयः ५० यत्रारंभेमहादैत्यमदीयस्मरणं
नहि तत्रत्वंदैत्यभावेनकुरुराज्यंमहामते ५१ तदीयपुण्यजंसर्वंत्वंभुंक्ष्वनित्यं
सुकर्मकं स्नानादिसकलंतद्वत्त्वदीयंनात्रसंशयः ५२ एवमुक्तोमहादैत्यःक्रो
धःपरमहर्षितः लंबोदरंप्रणम्यैवययौस्वस्थानमुत्तमं ५३ मेमदकायमहा
दैत्यतान्वत्सस्व यथासुखं गाणपत्यप्रियस्त्वंवैभविष्यसिनसंशयः ५३ दे

त्याराहुमुखाः सर्वे तत्यक्त्वा भयसंयुताः पातालं विविशुर्विप्रो घृष्णः संहर्षितो भवे
त् ५५ एवं क्रोधासुरं शांतं चकार गणनायकः क्रोधो गणेशभक्तिं वै कुर्वन्स्वस्वं
स्थितो भवत् ५६ इति श्रीमदांत्ये मौद्गले पं० खं० क्रोधासुरशांतिवर्णनं नामाष्टमो
ध्यायः ८ ब्रह्मोवाच० एवं क्रोधासुरं शांतं दृष्ट्वा देवर्षयोमलाः हर्षयुक्ता विशेषेण
पुपूजुर्गणनायकं १ पूजयित्वा विधानेन नेमुर्लंबोदरं पुनः ततस्ते तुष्टुवुः सर्वे
भक्तिनम्रात्मकंधराः २ देवर्षय ऊचुः अग्रे प्रधानं सकलादिभूतं सर्वातिगं पूर्ण
मनंतभावं नित्यं निजात्मानमचिंत्यसंस्थं लंबोदरं तं च वयं नताः स्मः ३ बोधेन ही
नं सुसुखेन मग्नं बीजात्मकं सांख्यमनंतवेद्यं वैदेहयोगेन च लभ्यमेवं लंबोदरं तं
च वयं नताः स्मः ४ जीवं परानंदमयं परोक्षं बोधस्वरूपं प्रकृतिलयस्थं देहैर्विही

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नंचनदात्महीनंलंबो०५ सोहंसदाभेदविवर्जितंचैदे[illegible]हात्मयोगंसकलावभासं
नित्यंपुराणंपुरुषंगणेशंलंबो०६ बिंदुस्वरूपंमनसाप्यगम्यंपादैर्विहीनंचचतुष्प्र
दयं नानात्मभेदाश्रितमेकदंतंलं०७नादस्वरूपंचगुणेशमेवं सर्वंचचक्षुः श्रुतिनं ग३
तुभूतं सर्वत्रहस्तोदरपादपद्मंलं०८ सत्यंसुषुप्तौसमभावदंचैद्वंद्वतमाद्यंद्वि
विधावभासं आनंदकंदंतमसाविभांतंलं०९ सूक्ष्मस्वरूपंचतथांतरस्थंसर्वत्र
माद्यंगणनायकंयं विज्ञानकोशस्थविहारकारंलं०१० स्थूलस्वरूपंसकलाभि
मानंश्रे[illegible]ष्ठंरजोयुक्तमनंतमाद्यं अनात्मभोगेषुविहारसिद्धंलंबो०११ अध्या
त्मरूपंतमसाचरंतंद्रव्यप्रकाशंपरमार्थ[illegible]भूतं देहेंद्रियज्ञानमयंचतुर्थंलंबो०
१२ नित्यंरजोदेहविकारगंचैकर्मस्वरूपंविविधेंद्रियस्थं तज्ज्ञाधिभूतात्मकमप्र

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मेयंलंबो० १३ ज्ञानस्वरूपंसकलामरस्थं सर्वेंद्रियज्ञानकरप्रभुंवै तज्ज्ञाधिदेव
प्रचुरं महांतंलंबो० १४ आकाशरूपंसकलावभासं नादप्रचुरंसकलादिभूतं
मूर्तैः सदाखिलकमादिनाथं लंबो० १५ वायुस्वरूपंजगदेकचालं प्राणादिसंस्थं
स्वाविभागदं यं देहप्रचुरं दशानामभिख्यं लंबो० १६ तेजःस्वरूपंसकलावभासं
द्वंद्वप्रचुरंजगरेसुसंस्थं संधौसदाव्याप्यविभागकारं लंबो० १७ आपूगस्वरू
पंरसयुक्तमेवं पुष्टिप्रदं षड्रसगंपरेशं नित्यार्द्रभावस्य प्रकाशदं यं लंबो० १८
पृथ्वीस्वरूपंचतुर्ज्ञानंवै लंबो० १९ वैराटरूपस्थमनंतपारं सर्वत्रनेत्रं चासह
स्रशीर्षं सर्वत्रहस्तानन्नपादकायं लंबो० २० युक्तंरजः सृष्टिकरंहिजेशमादि
स्वरूपंप्रपितामहं यं सामान्यभावेमसुरामरस्थं लंबो० २१ सत्वप्रचुरंहरिरूप
[illegible] धराध्यरेशंसर्वत्रमत्र्लं विविधौघधिस्थं ॥ आकाररूपंच + २

॰सदा भाग्यं सर्वकार्येषु सर्वदा ॥२१॥ मारतो आटनाक्ति निस्तोत्रे सोव स्तुरर्षयः ॥ भविष्यतिप्र

धारं पं तामसं शंकरवेशासंस्थं सूर्यप्रचुरं जगदंबरूपं लंबो २२ इत्यादिभेदैः सुविराज

मानं सर्वैर्विहीनं तु कथं स्तुवामः वेदाः शिवाद्याश्च विकुंठिता वै लंबोदरं तं च वयं नताः स्मः

२३ ब्रह्मोवाच एवं स्तुत्वा प्रणेमुस्ते देवर्षयो गजाननं तानुवाच महाभागाँल्लंबोदरः

सुसिद्धिदः २४ लंबोदर उ० भवत्कृतमिदं स्तोत्रं मत्प्रीतिवर्द्धनं भवेत् पठतां शृण्वतां

चैव सर्वसिद्धिप्रदायकं २५ धर्मार्थकाममोक्षाणां साधनं ब्रह्मदं परं भविष्यति न

संदेहः परकृत्याविनाशनं २६ पुत्रपौत्रादिकं सर्वं लभते स्तोत्रपाठतः [redacted]

[redacted] धनधान्यकलत्रादिसुखं विंदति मानवः २८ कारागृह

गतं सद्यो मोचयेत् स्तोत्रपाठतः मनोऽभिप्सितं लभेत् सर्वमेकविंशतिवारतः २९ नववि

शतिपाठांश्च स्तोत्रस्यास्य करिष्यति समस्तं च फलं भुंक्त एकविंशतिनावधिः ३०

प्रसन्नोहं प्रदास्यामि स्तोत्रेण मुनयोमराः वरं ब्रूहि महाभागा यद्यपि स्यात्सुदुर्लं
भं ३१ लंबोदरवचः श्रुत्वा देवर्षयः प्रणम्य तं जगुः प्रहृष्टचित्तास्ते साश्रुनेत्राः सुयं
त्रिताः ३२ देवर्षय ऊचुः लंबोदर प्रसन्नोसि वरदोसि महाप्रभो तव भक्तिं सुसंपूर्णां
देहि नः क्रोधविवर्जितां ३३ क्रोधासुरस्त्वया नाथ हतः सुरांतिधारकः तेन
विघ्नेशं गणाधीशावरयुक्तं कृतं प्रभो ३४ स्वस्वकर्मरताः सर्वे भविष्यंति सुधर्मि
णः वयं च स्वाधिकारेषु स्थास्यामस्त्वत्प्रसादतः ३५ मुनयो भयहीनास्तु यथा
चारकराः प्रभो भविष्यंति गणाध्यक्ष किं वरं वृणीमहे ३६ एवमुक्त्वा प्रणेमुस्ते लु३
८२ लंबोदरं सुखप्रदं ननृतुस्तत्पराः सर्वे हर्षनिर्भरमानसाः ३७ तथेति तानुवाचैव
लंबोदरः प्रतापवान् अंतर्धानं चकारासौ पश्यताममरर्षिणां ३८ ततो देवाद्यि २७

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ज्ञास्तत्र मूर्त्तिं कृत्वा सुशोभनां चतुर्भुजां गणेशो नाम्ना स्थापयामासुरादरात् ३९
पश्चिमे सागरे तीरे पुपूजुस्तां विशेषतः तदादिस्तत्र सम्भूतं क्षेत्रं बोदरस्य च लं २
४० अंशेन साधिकारेषु स्थितं देवर्षयो मल्लाः पूर्णभावेन तत्रैव भक्तिं कुर्वंति
नित्यदा ४१ एतत्ते लंबोदरस्यैव कथितं सुचरित्रकं विश्वामित्रवसिष्ठौ च सं
श्रुतं ते कोधनात्मनं ४२ असद्ब्रह्ममयश्चायं लंबोदरो गणेश्वरः स्वतः परतनुत्वा
न करोति लीलया प्रभुः ४३ तस्य रूपं परं केन वक्तुं नैव प्रशक्यते सर्वसंयोगा
योगानलभ्यते योगसेवया ४४ अयं लंबोदरश्चैव पूर्णयोगप्रवाचकः संयो
गायोगयोर्योगे लभ्यते योगसेवया ४५ गुढरात्तस्य संभूतो संयोगायोगरू
पकौ तेन लंबोदरश्चापं कथ्यते वेदवादिभिः ४६ असितनुं० एवमुक्त्वा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्वयंब्रह्माविरराममहीमते वसिष्ठस्तं प्रणम्यैव गतः स्वाश्रममंडले ४७ विश्वा
मित्रश्चमेधावीनिः श्वसन्स्वस्थलं गतः एवं गते मया तत्र पृष्टः सोपि पितामहः
४८ इति श्रीमदादित्ये मौद्गले० पं० लं० देवर्षिकृतस्तुतिवर्णनं नाम नवमोध्या
यः ९ नैध्रुव उ० श्रुत्वा कथां महारम्यां क्रोधशांतिकरीं प्रभो नतृप्यामि पुनः
स्वामिन्वद विघ्नेशचेष्टितं १ त्वया पृष्टः कथं ब्रह्मा सज्जगाद किमप्यहो तद्वदस्व
दयासिंधो तातयोगप्रदं हि चेत् २ मुद्गल उवाच० एवं पृष्टो महातेजा नैध्रुवेण
पितृव्यकः उवाच तं महायोगप्रदं कथांतरं महत् ३ असित उवाच शृणु पु
त्र प्रवक्ष्यामि योगशांतिपदप्रदं गणेशज्ञानस्य माहात्म्यं ब्रह्मेशस्य विचक्षणः ४
ब्रह्माणं च प्रणम्यादौ वपृष्ठं विनयान्वितः वद तात महायोगं शांतिदं सर्वतारकं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

५ सहजं च महायोगिन्स्वाधीनत्वं प्रदृश्यते स्वेच्छामयं कयं कथं ब्रह्म भवति
नोपयेतेन मः ६ अतः शांतिविहीनो त्वां समागतो न संशयः शांतस्थं वद किं से
मं करिष्यावस्वादात्रपा ७ असित उवाच० वत्सरेण मया तात पृष्टः सर्ववित्
वरः उवाच प्रसंयुक्तो गणपस्य पितामहः ब्रह्मोवाच० कर्म ज्ञानं समं ब्रह्म सं
हजं तु चतुर्थकं तेषां संयोगभावे वैस्थोनं दोमोन धारकः ८ तत्र स्वाधिनगां ब्र
ह्म [redacted] पराधीनं कुत स्त्रिधा॥ स्वसंवेद्यमयो नैव योगेन लभ्यते सुतो ।
संयोगो मायया युक्तः सर्वसंयोगभवतः अयोगे सर्वसंयोगो न त्वयति व्यतिरेक
तः ११ निवृत्या स्वधिया ब्रह्म प्राप्यते नान्यथा क्वचित् स्वकीयाभेदतस्तत्र नि
वृत्तिर्योगिभिर्धृता १२ संयोगायोगयोर्योगे योगः शांतिप्रदायकः शांतस्तातदे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

चलभ्यश्च भवति नान्यथा मुने १३ शांतिरूपधरं पूर्णं गणेशं संवदंति च।
वेदास्तं भावसंयुक्तो भजिष्यथो यदा मुने १४ तदा शांतियुतो योगी भवेत्तो यो
गिसंमतो भविष्यथो महाभागो नान्यथा मे वचोनृतं १५ संप्रज्ञातमयो दे
हो संप्रज्ञातमयं शिरः गजाकारं तयो योगे गणेशो देहधारकः १६ गणाः।
समूहरूपाश्च समूहा ब्रह्मवाचकाः तेषां स्वामिन संदेहो गणेशो नामधा
रकः १७ चित्तरूपा महाबुद्धिश्चित्तमोहकरी मता सिद्धिस्तयोः पतिः साक्षा
द्गणेशो वेदवादतः १८ त्यक्त्वा मोहयुतं चित्तं चिंतामणिं भजिष्यथः योगं शा
स्या महाभागौ नित्यं तं योगरूपकं १९ असितउवा० एवमुक्त्वा विधाता सवि
रराम महामते वत्सरेण समायुक्तस्तं प्रणम्य वने गमं २० आवाभ्यां स्वाधि

तंपुत्रयथोद्दिष्टंचवेधसा ज्ञामयुताभ्यांवैज्ञांतिः प्राप्तासुभिनिश्चला २१
तथापिगणराजस्य भजनेनिरतौपुरागतौवर्षेगणाध्यक्ष आपयावरदायकः
२२ तंदृष्ट्वाप्रणतौदेवं पुनःपूज्ययथाविधि तुष्टुवातुर्गणेशानंभक्त्यान
म्रात्मकंधरौ २३ असितवत्सराक्षं लंबोदरनमस्तुभ्यं सततंयोगरूपिणे
योगाकारशरीराय योगशांतिप्रदायिने २४ विघ्नेशायमहाभक्तानांविघ्न
हरणायच अभक्तानांमहाविघ्नकारिणेतेनमोनमः २५ स्वानंदवासिने
तुभ्यंसदास्वानंददायिने मूषकवाहनायैवमूषकध्वजिनेनमः २६ अना
थायगणेशायसर्वेषांनाथरूपिणे नाथानांनाथरूपायविनायकनमोस्तु
ते २७ हेरंबायचसर्वेषांमात्रेपित्रेनमोनमः ज्येष्ठराजायज्येष्ठायज्येष्ठानां

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मौ॰ पु॰ ३० ज्येष्ठतेनमः २८ अमेयायाप्रमेयायानंतखेलकरायेयते अनंतोरूपनंतेपाया खं॰ ५
नंतदायनमोनमः २९ सिद्धिबुद्धिपतेनाथभक्तिसंरक्षकायच नानाशक्तिप्र
पालयानंतमायाविहारिणे ३० गजवक्त्रायसर्वेषामादिपूज्यायतेनमः स
र्वपूज्यायसर्वेषांसिद्धिदायनमोनमः ३१ वक्रतुंडायवीरायचैकदंतायतेन
मः महोदरायदेवायदेवदेवेशमूर्त्तनमः ३२ असुराणांसहायायनानावरप्र
दायच असुराणांनिहंत्रे ते आसुरायनमोनमः ३३ ब्रह्मणांपतयेतुभ्यंब्र
ह्मणांब्रह्मदायिने ब्रह्माकारायवैतुंडे वेदवेद्यायतेनमः ३४ मनोवाणी
विहीनायमनोवाणिमयायच योगरूपायपरूपायसर्वमपाविवर्जितं ३५
किंस्तौवस्त्वांगणाधीशायच शांतिसमागताः वेदायोगींद्रमुख्याश्चानंतां ३०

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

चप्रणवाचहे ३६ एवं स्तुतो गणाधीशो जगाद तौ महामुनी । वरं संवृणुतं वि
प्रौ दास्यामि भक्तियंत्रितः ३७ भवद्भ्यां यत्कृतं स्तोत्रं तद्वै मे प्रियं भवेत् सर्व
सिद्धिप्रदं पूर्णं भक्तिदायकं तथा ३८ एवमुक्तौ महायोगिनौ चतुर्गजाननं कृ२
व्या०४ भक्तिं देहि गणाधीश त्वत्पादे सुदृढां परां ३९ गाणपत्यप्रियत्वं नो देहि नाथ
नमोऽस्तु ते नान्यं वरं गणाधीश वरावः सुखदं क्वचित् ४० तथेति तावुवाचाथ
गणेशोऽन्तर्दधे स्वयं आवां भक्तिसमायुक्तौ भजावो गणनायकं ४१ इति ते क
थितं वत्स ज्ञानं गणपतेर्मया ऊर्ध्वमधःपरो भूत्वा भज त्वं गणनायकं ४२ ए
वमुक्त्वासितस्तं वै नैध्रुवं गणपस्य सः मंत्रं ददौ प्रजानाथ तत्स्माराकाक्षरं पु
नः ४३ ततस्त्वान्तर्हितो योगी सोऽसितः परमार्थवित् नैध्रुवस्तु तपस्ते

ग॰

मौ॰ पु॰ वैणेत्रां पूज्ययत्नतः ४४ इति श्रीमदांत्ये मौद्गले॰ पं॰ लं॰ वत्सरासितिगुं खं॰ ५
३१ त्तिप्राप्तिवर्णनंनामदशमोध्यायः १० मुद्गल उवाच॰ नैध्रुवो योगगम्या
ञमार्गेण शमदमपरायणः शांतिप्राप्तः क्रमेणैव योगिवंद्यो बभूव ह १ ततः म॰ ३
सोपि गणाधीशं नमुमोच तत्तापतं तपः सेवापरो भूत्वा गाणपत्यप्रियार्थ
तः २ एवं तस्य तपो ज्ञात्वा तमाययौ गजाननः तं दृष्ट्वा सहसोत्थाय प्रणना
मकृतांजलिः ३ पुपूज भक्तिसंयुक्तः साश्रुनेत्रो महायशाः सरोमांचः
संतुष्टाव सूक्तैर्गाणेशवैः प्रभुं ४ ततस्तुष्टो गणाधीशस्तस्मै भक्तिं ददौ दृढां
गाणपत्यप्रियंकृत्वांतर्द्धानं संचकार वै ५ तदादि नैध्रुवो योगी गाणप
त्यो बभूव ह भजते गणनाथं सोधुना सर्वत्रदं परं लंबोदरस्य माहा ३१
× संमतः ॥ द्धा ॥ इति लेकथितं दक्षचरित्रं सर्व +

त्वं सर्वेशांतिप्रदं प्रभो ७ क्रोधासुरचरित्रं तत्तथा ते कथितं मया श्रवणात्क्रोधशांति
दं भवेत्तस्मिन संशयः ८ स्वस्वखंडेषु सर्वत्र पश्चिमांतदिगंतरे मुनिभिः स्थापितश्चै
व लंबोदरो गजाननः ९ तस्य दर्शनमात्रेण मनेप्सितं फलं लभेत् समुद्रतीरसंस्थस्य
मूषकारूढकस्य वै १० एवं लंबोदरस्यांशा अनंता विविधाः स्मृताः स्वस्वधर्मप्ररक्षा
र्थं जनेभ्यः सर्वदा प्रभो ११ तस्याश्चरित्रकार्यं तं वक्तुं नैवं प्रशक्यते वत्सादिदिभिर्महा
भाग तत्र केहं नराकृतिः १२ जगद्ब्रह्मक्रियार्थं स्याचिंतस्तैः पुरा प्रभो शक्तिरूपावता
रश्च धृत्वा सर्वार्थदोभवेत् १३ महिषासुरनाशार्थं याचितो मायया पुरा विघ्नराजः
स्वयं सोपि बभूव धर्मपालकः १४ मायाकरविनाशार्थं शेषपुत्रो बभूव ह लंबोदरः
स्वयं साक्षान्मूषकगः स वै स्मृतः १५ सावर्णिमनुना चैव [illegible]राधितो गणनायकः शा
वो १

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

क्तिं विनायकस्तत्र लंबोदरो बभूव ह १६ ब्रह्म नानाविधं देदे कथितं तु प्रजापते ज्ञा
नेषां तत्र भिन्नविहारार्थं बभूव ह १७ तेषु स्वानंदभावेन स्थितो यं ब्रह्म धारकः संयो
गाभेदयोगेन लंबोदरः स वै स्मृतः १८ संयोगाभेदयोगेन समाधिना प्रजापते
नानाविधं जगद्ब्रह्म न रूपं तितह्म तं भवेत् १९ तेषां भेदा गणेशेन स्वष्टाश्च पालि
तास्तथा हृतास्तेन समाख्यातो वेदसद्ब्रह्मवाचकः २० भेदा असत्यरूपाश्च तेषां
ब्रह्म प्रकथ्यते शक्तिस्तामेव जानीहि लंबोदरं गजाननं २१ तदुदरात्समुत्प
न्ना अंते तत्र गता बभुः भेदास्तेन समाख्यातो लंबोदरो त्वसन्मयः २२ इदं लं
बोदराख्यानं कथितं ते प्रजापते श्रवणात्पठनात्सर्वदायकं सर्वसंमतं।
२३ श्रोतुमिच्छसि किं भूयस्तद्वदस्व प्रजापते कथयिष्यामि ते भावं ज्ञात्वा गणेश्व

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

रेप्रभो २४ इति श्रीमदांत्ये मौद्गले० पं० लं० लंबोदरचरि० ब्रह्मवर्णनं नामैकादशो
ध्यायः ११ शौनक उवा० लंबोदरस्य माहात्म्यं श्रुतं क्रोधहरं परं श्रोतुमिच्छा तथा
मेपि वर्द्धते भावसंयुता १ अहो मुद्गल माहात्म्यं को जानाति सुखप्रदं यस्य मुखांबु
जाच्चैव श्रवति शांतिदामृतं २ अतो वद महाभाग पुनर्विघ्नेशसत्कथां दक्षेण
संश्रुतां पुण्यां मुद्गल योगिसागरात् ३ सूत उवा० मुने शौनक धन्यस्त्वं शृणु कथा
मृतं महत् ४ लंबोदरकथां श्रुत्वा दक्षो सामाप प्रजापतिः प्रणम्य मुद्गलं विप्रमुवा
च वचनं हितं ५ दक्ष० धन्योसि योगिवंद्योसि मुद्गल त्वं न संशयः कथां वदसि क
श्रुला २ ल्याणदायिनीं हर्षवर्द्धनीं ६ श्रुत्वा नमे तृप्तिर्जायते मृतसन्निभां अधुना
वद योगींद्र पुनर्गणपतेः कथां ७ लंबोदरः कथं चायं शक्तिरूपो बभूव ह तस्य

मौ॰ पु॰ चरित्रमुख्यं मेवद सर्वार्थदायकं ८ ज्ञानकामं संराधितो देवो महिषस्य वधाय च क खं॰ ५
३२ कथं प्रगटरूपो सौ बभूव तद्वदस्व मे ९ ऋषिपुत्रः कथं साक्षाद्बभूव गणनायकः
मायाकरणो ज्ञायमूषकगः कथं स्मृतः १० सावर्णिमनुना चैव कथं संराधितो भ
वत् कथं मुक्तिगणेशानो वक्तारः प्रबभूव ह ११ एतत्सर्वं सुविस्तार्य वद मे करु
णानिधे लंबोदरावतारश्च सुखदः श्रवणात्प्रभो १२ अन्यत् लंबदं योगींद्र
गा॰ गाणपत्यस्वरूपकं दीक्षायुक्तविप्रेषु कीदृग्गाणपाः स्मृताः १३ पूजा गण
पतेश्चैव कीदृशी कीर्तिता जनैः मंत्रः केन प्रकारेण गृह्यते गुरुवक्त्रतः १४
[illegible] विधियुक्तं गाणपत्यं मार्गमेव वद विस्तरात् येनाहं गाणपत्यश्च भवविष्या
मि सुदीक्षया १५ गाणपत्यांश्च योगींद्र ज्ञास्यामि हृष्टिगान्प्रभो तदर्थं वद विप्र ३२

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

र्थं सर्वज्ञोसि न संशयः १६ महायोग्यपनेत्त विप्रदर्शनं मे भवत्किल तवपादस्य
वैचित्र्यं सर्वसंतोषकारकं १७ सूत उवाच॰ एवं पृष्टो महायोगी दक्षेण गणपप्रि
यः जगाद तं प्रजानाथं भावेन तोषितः पुनः १८ मुद्गल उ॰ धन्योसि कृतकृ
त्योसि दक्ष त्वं नात्र संशयः येन गणपतौ प्रीतिरद्भुता प्रजापते १९ शृणुः श्रो लेः
तुश्च वक्तु वै पावनीं सर्वदां परां गाणेशीं कथयिष्यामि किं दृष्ट्वा सुतोषितः २०
औदाम ब्रह्म च यस्योक्तं तं देव ब्रह्मणि स्थितं स्वेच्छातत्र समुत्पन्नो मायापातस्य प्रजा
पते २१ स्वेच्छया द्विविधि ज्ञातं तद्देव नात्र संशयः स्वतः परतस्त्यानाम्त च्छण
षसुयोगदं २२ सदा सुखे स्वे निष्ठं वै नाना मायाविवर्जितं तद्देवपरा तो स्या
नं वाचकं कथितं मया २३ मायाखेलकरं यच्च ब्रह्म स्वस्थामयं [redacted]

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

प्रमोऽखतत्तत्स्यात्कंप्रोक्तंवेदेषु परूपमानद २४ स्वतन्तत्स्यानकंब्रह्मविकल्पंप्र
चकारह विकल्पात्तंद्विधाभूत्तेमकानेकमयपत्वतः २५ एकंदेहिस्वरूपंतद्बहु
रूपंशरीरकं ताभ्यांचतुर्विधंसृष्टंजगदेतच्चराचरं २६ एतेब्रह्मगणाःसर्वेक्रि
यासामर्थ्यहीनतः नशक्ताःस्वस्वकार्येषुतत्प्रायुक्तास्ततोभवन् २७ स्वस्वरूपं
चसर्वेषांभवतिकिलयादृशं तादृशंगायनमस्तप्यं मंत्रंजेपुःपरेश्वराः २८ दि
व्यवर्षसहस्रेणप्रसन्नोगणनायकः नरकुंजररूपःसप्रकटोभूद्द्विजप्रभुः
२९ तंदृष्ट्वा [illegible] ज्ञानसंपन्नाजाताब्रह्मगणाःपरं ततस्तेज्ञानशीलाश्चपुपुजु
र्हृदिसंस्थितं ३० तेषांपुरःस्वयंसाक्षात्प्रकटोभूत्प्रजापते शक्तिरूपधरोभू
त्वाप्रसन्नोवरदायकः ३१ चतुर्बाहुधरोदेवीसर्वावयवसंयुता स्तन

भारभराक्रांता शुशुभे परमात्मिका ३२ तां दृष्ट्वा विस्मिताः सर्वे पप्रच्छुः स्वहितेरता०
का त्वं कस्माद्धि हा याता वद नः सकलं परे ३३ देव्युवाच० गणेशोहं महाभाग यं ध्या
ध्यायथ तपोन्विताः तपसा तुष्टभावेन वरदो तामसामागतः ३४ एवमुक्त्वा स्वयं तत्र
शक्तिः सा परमाद्भुता गजवक्त्रयुतं रूपं दधे तेषां प्रपश्यतां ३५ लंबोदरं समालो
क्य पुनर्विस्मितचेतसा स्तोतुं ते समारब्धास्ताव त्स्त्री रूपमादधे ३६ दृष्ट्वा ब्र
पे४ ह्मगणास्तां ते विस्मिता गणेरताः गणेशः कृपया सर्वे ज्ञानयुक्ता बभूविरे
३७ ततस्ते श्रेष्ठितं तस्य ज्ञात्वा मत्वा प्रजापते लंबोदरः स्वयं शक्तिरूपोयं नात्र
संशयः ३८ यां शक्तिः स गणेशो नो गणेशः शक्तिरुच्यते लंबोदरात्मिका साक्षा
त्सर्वेषां जननी परा ३९ ततस्तां ते प्रणम्यादौ तुष्टुवुः करसंपुटाः ब्रह्मगणाः

प्रज्ञानाय सरोमांचा विज्ञोषतः ४० ब्रह्मगणानुचुः नमस्ते शक्तिरूपायै सर्वेषां च
क्रियात्मने सर्वसत्त्वप्रदात्रै ते जगदंबे नमो नमः ४१ अपारा चैव सर्वेभ्यः सर्व
दायै नमो नमः भक्त्यास्वाधीनरूपायै महामायै नमोस्तु ते ४२ सदास्वानंदसं
स्थायै जगद्ब्रह्मप्रचालिके नानाभेदधरायै ते विघ्नघ्न्यै नमो नमः ४३ अमेया
यै नमस्तुभ्यं भक्तसंरक्षरूपिणे कर्त्र्यै पात्र्यै च संहर्त्र्यै गणनाथायै नमो नमः।
४४ त्वदुरादुत्समुत्पन्नं जगद्ब्रह्मनमस्तुप्यः तदेव सृष्टिरूपं ते तनुदरं ते नमो नमः
४५ स्तनपानेन देवेशि पोषणं कुरुषे सदा स्थितिरूपं तदेवांगे स्तनौ ते वै न
मो नमः ४६ अंते प्रलयकाले त्वं मुखेन ग्रसितं त्वया संहारं च तदेवांगे मु
खं ते वै नमो नमः ४७ मनोवाणीविहीनालं भक्तवत्सलमावतः देहधारि स्वयं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ज्ञाता भ क्तेशायै नमो नमः ४८ किं स्तौमि त्वां महामाये शक्तिनामाधरे परे सर्व
त्र शक्तिभावेषु संस्थितायै नमो नमः ४९ वेदानां योगिनां चैव शक्ते त्वं तत्त्वदीपकं
तां स्तोतुं कः समर्थः स्यादतस्त्वां प्रणवामहे ५० इति स्तुता जगन्माता ब्रह्मणां जन
नी प्रभो प्रसन्नाता नुवाचा प्रभावेन परितोषिता ५१ शक्तिरुवाच वरान्वृ
णुत ब्रह्माणि ये वो पद्मनसीप्सितान् दास्यामि तपसा तुष्टा भक्त्या स्तोत्रेण स
र्वपाः ५२ भवद्भिः कृतं मदीयं यत्स्तोत्रं सर्वार्थदं भवेत् भक्तिप्रदं महाभागाः सर्व
सामर्थ्यदायकं ५३ यं यमिच्छति तं तं वै दास्यामि स्तोत्रपाठतः भुक्तिमुक्तिप्र
दं पूर्णं भविष्यति न संशयः ५४ एवं शक्तेर्वचः श्रुत्वा ब्रह्माणि तं प्रणम्य च
जगुः प्रहृष्टभावेन तां सर्वमातरं परां ५५ ब्रह्माण्यूचुः वरान्दास्यसि स

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वैरितद्दात्ते भक्तिमुत्तमां देहि न्वक्तियया मोहोन नृपतिनात्र स नृपः ५६ किं
कर्त्तव्यं महादेवि तत्र सामर्थ्यमुत्तमं देव्यस्मभ्यस्ततो मातः करिष्याम
श्चेतप्रियं ५७ तेषां वचनमाकर्ण्य संतुष्टा सर्वदायिनी तथेति तानुवाचा
यांतर्द्धानं साचकार ह ५८ ततो वर बलेनैव सृष्ट्वा विश्वं चराचरं स्व
स्वभागप्रदं भिन्नं तेते पृक्षीडंति नित्यदा ५९ पालयंति च विश्वानि सं
हरंति प्रजापते स्वमहिम्नि स्थितान्येव ब्रह्माणि नात्र संशयः ६० इति
ते कथितश्चायमवतारः पुरातनः लंबोदरस्य भो दक्ष नानाशक्तिरूपः सुख
प्रदः ६१ यः शृणोति नरो भक्त्या तस्मै सर्वार्थदो भवेत् ब्रह्मभूतकर
श्चापि भुक्तिमुक्तिप्रदः परः ६२ सूत उ० श्रुत्वा मद्गलवाक्यं वै दक्षो द

ष्टमनाः स्वयं जगाद तं पुनर्विप्रं संज्ञायसंयुतः शृणु ६३ दक्ष उवाच त्वया
मुकुलमाहात्म्यं कथितं ज्ञाकिसं[illegible]वं श्रुतं मया महाभाग तथापि संशयं नु
द ६४ ब्रह्माणि देहहीनानि देहिहीनानि योगिप तेषु तपादिकं नाथ कथं ही२
भवति तद्वद ६५ साक्षान्नेत्रादिकं सर्वं स्तुतिपूजादिकं प्रभो कथं तेषु भवे
देतद्वदतोहं भ्रमितोधुना ६६ तस्य तद्वचनं श्रुत्वा हर्षयुक्तो महामुनिः जगाद
तं प्रजानाथं सर्वज्ञानां शिरोमणिः ६७ मुकुल उवा० ब्रह्माणि ब्रह्मभूतानि
६२ तेषु नास्ति महामते देहदेहिमयो भावः इति सत्यं श्रुतिमुखात् ६८ तथापि
सर्वरूपाणि वदंति तानि निश्चितं देहविकारहीनानि देहरूपाणि सर्वतः
६९ देहिविकारहीनानि देहिरूपाणि सर्वतः ताभ्यां हीनानि मो दक्ष द्वा

भ्यां च संयुतानि वै ७० ब्रह्माणि सर्वशास्त्रेषु विचारपूर्वं प्रवर्ण्यते अतः सर्वं
सदा तेषु संभवन्ति न संशयः ७१ अन्यच्च शृणु वाक्यं मे सर्वसंशयनाशनं
ब्रह्मणि ब्रह्मभावस्थं वक्तुं केन न शक्यते ७२ तेषां तथादिकं सर्वं भोगा
दिकं महामते कथनीयं कथं नाथ सैव दंडवद्दर्पते त्वया ७३ शिष्यस्याबो
धदानार्थं जानीहि त्वं प्रजापते मा कुरुष्व वृथा नत्र संशयं वा विकार
कं ७४ सूत उ० मुद्गलस्य वचः श्रुत्वा हृष्टो दक्षस्तमब्रवीत् संशयो मे
गतः स्वामिंस्त्वदुक्तवचसाधुना ७५ अधुना वद माहात्म्यं लंबोद
रस्य मानद सर्वज्ञस्त्वमतः सर्वं निःसंशयं करोषि वै ७६ इति श्रीमदा
द्ये मौद्गले ० लंशक्तिस्वरूपावतारवर्णनं नाम द्वादशोऽध्यायः १२ मुद्ग

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

लनुवाच॰ पुरा दैत्याधिपः क्रूरो ब्रह्मणो वरदानतः महिषासुरनामासर्व
भूर्वभुवनाधिपः १ जित्वा देवगणान्सर्वान्स्वर्गेषु दैत्यपांस्तथा स्थापया
मास दुर्बुद्धिरवध्यः सर्वभावतः २ ततः कर्मविहीनं वै चकार सचराचरं
अभवन्नमराः सर्वे [illegible] उपोषणपरास्ततः ३ ततो देवर्षिभिस्त[illegible]
त्रैस्तपसाराधिताभवत् शक्तिः सर्वमयी साक्षाद् सत्यानंदवासिनी ४ स
हस्रेष्वगतेषु वै वर्षेषु प्रकटाभवत् वरदा ते वृता देवी वधाय महिषस्य
सा ५ पुरुषान्नभयं तस्य भवति महिषस्य च जित्वा वयं महादेवि
श्च नो महतो भयात् ६ तस्य नानुं कुरूपत्वं सर्वेषां सुखकारणात् पुत्रा
श्च वयं देवि रक्ष रक्ष महाभयात् तथेति ता [illegible] उवाच वै व सिंहगा को

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

घसंयुता ययौ दैत्यवधार्थं सा महामाया प्रजापते ८ मोहिनीरूपकं धृत्वा
स्थिता वनांतरे जगौ गानेरसयुक्ता शक्तिः शुश्राव तत्र कोसुरः ९ स आग
त्य महाशक्तिं दृष्ट्वा मोहयुक्तोभवत् गत्वा दैत्याधिपं सद्यः कथयामास
विस्तरात् १० ब्रह्मांडे समा किंचिद्रूपेण तेजसा तया स्त्रीरत्नं तद्द्विजा
नीहि गृहाण राज्यभोगिनीं ११ दैत्यस्य वचनं श्रुत्वा मोहयुक्तो महासु
रः प्रधानं प्रेषयामास तां समानेतुमादरात् १२ प्रधानेन महामाया दृ
ष्टा मोहविवर्द्धिनी मोहितः स तु वाचाथ तां सर्वांगरूपिणीं १३ महिषो
देवि सर्वस्य ब्रह्मांडस्य पतिः परः मृत्युहीनः सदा यौवनशालीनः [illegible] भपाय
तः १४ तेनाहं प्रेषितो [illegible] नूनं त्वदर्थे रूपशालिनि भव

पत्नीमहाभागे दैत्येन्द्रस्य महात्मनः १५ तस्य तद्वचनं श्रुत्वा क्रोधयुक्ता बभूव
ह जगाद तं मदोत्सिक्तं दैत्यामात्यं प्रजापते १६ शक्तिरुवाच परास्याहं महादैत्य
स्त्री किं वदसि मां वचः मूढ च त्वां हनिष्यामि पुनर्भाषणसंयुतं १७ तस्यास्तद्वच
नं श्रुत्वा क्रोधयुक्तो महासुरः दैत्यानाज्ञापयामास तां समानेतुमादरात् १८ त
दाज्ञया महादैत्याः समाजग्मुः समंततः तान्दृष्ट्वा क्रोधसंयुक्ता बभूव सा यश
स्विनी १९ क्रोधानलेन सर्वान् सा ददाह च प्रजापते ततो दृष्ट्वा परमाश्चर्यं पप
लस्सचिवो भयात् २० ज्ञात्वा वृत्तांतमसुरः स महीषो मोहसंयुतः स्वयं स सचिवान्प्रे
षयामास धर्तुं समीपसंस्थितान् २२ देव्या शस्त्रप्रहारेण हताः सर्वे प्रजापते त
तो ति[illegible] कोपसंयुक्तः स्वयं रणे समागतः २३ समागतं महादैत्यं देवी क्रो
+ सैन्यसमायुक्त आययौ तां यशस्विनीं ॥२१॥ तां दृष्ट्वा कामबाणैः स विद्धो दैत्यो

छि प: स्यें ॥३

घसमन्विता धनुःसज्यमथाकृत्वा बाणांश्चिक्षेपदारुणान् २४ तद्बाणैरपि
दैत्येन्द्रा मृताः केचिद्व्रणान्विरे केचिच्छिन्नास्तथा केचिन्मूर्छिताः संबभूवि
रे २५ ततः कोपयुतो दैत्यो महिषासुरसंज्ञि च युयुधे तां महाभागां नानान्ना
स्त्रास्त्रकैः परैः २६ युद्धं तत्र महाघोरं पतितं भयदायकं सर्वेषां च प्रजाना
म्परस्परजयैषिणाः २७ एकवर्षं महादैत्यो युयुधे च तया पुरा ततः कोपस
मायुक्तः पर्वतं चिक्षेप सुरः २८ पर्वताघातमात्रेण मूर्छितां जगदंबिकां ता
दृष्ट्वा तां गृहीत्वा संगंतु समुद्यतो भवत् २९ तावत्सा सावधाना भूद्दृष्ट्वा दैत्यं
महाबलं अंतर्धाय स्वमात्मानं ययौ देवी स्वमालयं ३० तत्र खेदसमायुक्ता
चतसिसाद घोरह अहो हं मनसा सर्वं भस्म कुर्यां क्षणद्धि तः ३१ स्त्रीहस्ते

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नमहादेव्यो मरिष्यति न संशयः तथापि मां जिगीषैव कथं यत्नो युता भवत् ३२
अतो विघ्नेश्वरेणैव कृतं विघ्नं न संशयः भ्रांताहं तम पूज्यादौ गता संग्राममंड
ले ३३ अहो शक्तिस्वरूपाहं मच्छक्त्या वर्तते खिलं जितास्त्रु शक्तिविहीना च जा
ता केन तु कमुत्तमं ३४ अतः शक्तिमभ्यक्त्वं मत्साध्यीनं न वर्तते विघ्नराजस्य स
त्ता याऽसत्त्यामान्यत्र भ्रांति जा ३५ यदा गणेश्वरस्तु तुष्टस्तदा शक्तीवामहश्वरः ब
ह्माणि शक्तिरूपाणि शक्तिर्नान्यत्कदाचन ३६ एवं मनसि संधार्य संतापसं
युता सती त्यक्त्वा सर्वं तपस्तेपे निराहारपरायणा ३७ विंध्याचलसमाश्रि
त्य संस्थिता जगदंबिका विघ्नराजं हृदि ध्यात्वा जजाप मंत्रमुत्तमं ३८ ए
वं वर्षसहस्रेण कालक्षर विधिना तथा तपसोग्रेण विघ्नेशः संतुष्टस्तां ययौ

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मौ०पु० परां ३९ अस्थिचर्मावशेषां तां वीक्ष्य विस्मितमानसः बोधयामास शक्तिं स विघ्ने स्वं०५
४० शः करुणानिधिः ४० विघ्नेश उ० पश्य शक्ते चर्मां प्राप्तं यं ध्यायसि निरंतरं वरं
दातुं वृणु च त्वं दास्यामि भक्तियंत्रितः ४१ भक्त्या च तपसा देवि संतुष्टं ते विशे
षतः तवाधीनं न संदेहः पश्य मां वरदायिनं ४२ तस्य तद्वचनं श्रुत्वा जग
दंबा बुबोध च अपश्यत्कृणराजं तं मत्वा पप्रणनाम सा ४३ पुपूज भक्ति
संयुक्ता तुष्टाव करसंपुटा पुनः प्रणम्य विघ्नेशं सर्वसिद्धिप्रदायकं ४४ शान्त्यु
वाच विघ्नेशाय नमस्तुभ्यं भक्तविघ्नविनाशिने अभक्तानां विशेषेण वि
घ्नकर्त्रे नमो नमः ४५ गणेशाय गणानां वै पालकाय परात्मने गणरूपाय
सर्वत्र संस्थिताय नमो नमः ४६ अमेयशक्तये चैवामेयाय प्रचालक मायया ४०

यका

[illegible] हीनस्वरूपायमायिभ्योमोहदायते ४७ ब्रह्मभ्योब्रह्मदात्रेचब्रह्म
णस्पतयेनमः ब्रह्मणोब्रह्मरूपायहेरंबायनमोनमः ४८ कर्मणांफलदात्रेते
कर्मधारक कर्मयोगस्वरूपायपरज्ञायनमोनमः ४९ ज्ञानिनांज्ञानरूपाय
ज्ञानानां ज्ञानधारिणे सदाज्ञानविहीनायज्ञानयोगाययतेनमः ५० समायसमरूपाय
समेभ्यःसमदायते आनंदानंदकंदायसहमहीनायतेनमः ५१ सहजाय
विहीनायसहजैः सहजात्मने सहज्ञानांतुयोगाय निर्मोहायनमोनमः ५२
स्वानंदायसदास्वानंदानांस्वानंदमूर्तये मायायुक्तायदेवेशसर्वाधीशायतेन
मः ५३ अयोगायसदाब्रह्मनिवृत्ति [illegible] धारिणेनमः असंप्रज्ञातभावायलं
बोदरानमोनमः ५४ शांतिरूपाययोगाययोगिभ्यो [illegible] योगदायते चित्तभू

मिविघ्नानायचिंतामणेनमोनमः ५५ क्षमापराधकं नाथविस्मृत्यान्नमसंयु
ता त्वामपूज्यगणाधीशागतोयोऽहं परात्परं ५६ अधुनामे वरं देहित्वं मत्या
दरसदायकं महाभक्तिप्रदं नाथयेनाहं तोषितास्त्वया ५७ जपं देहि गणाधी
देवे ८ शामद्विषस्यवधायवै एतान्वदेवैर्गानमस्तेपरमेश्वर ५८ एवं संस्तुवदे तस्त
स्याभक्तिरसः समुद्भवः तेन वक्रानन तौ वसाश्रुनेत्राप्रजापते ५९ तादृशी
म निरीक्ष्य वक्रं वो दृष्ट्वा जगाद तां त्वया यद्वा चित्तं दे वितत्सर्वं सफलं भवेत्।
६० त्वया कृतमिदं स्तोत्रं भक्तिरसप्रदं भवेत् अपराधस्य देवस्तिसहनका
रकं मपि ६१ भुक्तिमुक्तिप्रदास्यामि स्तोत्रेण स्तं स्तुतो त्वहं यं यं चिंतयते
कामं तं तं दास्यामनिश्चितं ६२ एवमुक्त्वांतर्दधे सोगणनाथोब्रह्मनायकः।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शक्तिः खिन्नेव तत्रास्य संस्थिता ध्यानसंयुता ६३ स्थापयामास मूर्तिं सा ब्राह्मणै
र्वेदपारगैः पूजयामास तां तत्र तत्तो योद्धुं समागता ६४ तदादि गणराजस्य स्थानं
तत्र पृथ्वीभुवि सर्वसिद्धिकरं पूर्णयात्राकारिजनस्य च ६५ ब्रह्मभूतकरं पूर्णं त
त्रैव मरणे सति विघ्नेश्वरस्य दक्षे तु स्थितं वै भूव सर्वदा ६६ महिषासुरकं देवी
जघान वरदानतः युद्धं कृत्वा महाघोरं जगद्रक्षणलालसा ६७ पुनः समा
गता देवी विघ्नेशं शक्तित्रयेप्रभो तत्र नित्यं महाभक्त्या भजते गणनायकं ६८ इदं
लंबोदरस्यैव चरित्रं सर्वदं परं यः शृणोति नरो वा पि पठति तस्य सं भवेत् ६९
इति श्रीमद्दौद्गले महापुराणे पं० लं० शक्तिवरप्रदानं नाम त्रयोदशोऽध्यायः १३ ॥ श्री
मुद्गल उवाच० अन्यच्छृणु महाभाग लंबोदरचरित्रकं शक्त्याधीनस्वभा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

वारभ्यं सर्वसिद्धिप्रदायकं १ एकदा मिलिता देवाः सर्वे नच प्रजापते विंध्ये दिन्ने म
हाक्षेत्रे यात्रार्थं गणपस्य च तत्र वादः समुत्पन्नो मुनीनां सर्वदा सन्निधौ पंचदेवाः
समानाश्च सगुणा निर्गुणप्रमाः ३ कथं विघ्नेश्वरो देवः सर्वपूज्यो बभूव ह सं
वादो पूजनीयः स चतुर्भिरपि निश्चितं ४ अन्यदेवस्य भक्तैश्च १ देवादौ गजान
नः पूजनीयः प्रयत्नेन किमिदं विपरीतकं ५ गणेशोत्कृष्टमोंकारादे
वापि शंभुशिवादयः इदं किं वेदवादेषु कथितमादि पूज्यता ६ यथा देवाश्च च
त्वारस्तथायं गणनायकः स्वस्वभक्तैर्विधानेन पूजनीयो यदा भ[illegible]वेत्
७ तदा सर्वं समं विप्राः स्वस्वमार्गपरं भवेत् शुभाशुभे गणाधीशः सर्वदा सं
मतः कथं ८ इति विवादके प्राप्ते राक्षिः क्रोधसमन्विता जगाद तान् मुनीन् सर्वान्

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

देवानां हितकाम्यया ९ शक्तिरू० लंबोदरोपमेकश्च वेदे संकथितो भवेत् न
वयं तादृशा विप्रा लंबोदरप्रवाचकाः १० तस्योदरात्समुत्पन्नं नानाविश्वं न सं
शयः नानाब्रह्म तथैवाश्च तत्रांतसंस्थितावमुः ११ मध्ये कालांशरूपेण क्री
डति गणनायकः अतः सर्वादिपूज्यः स सर्वपूज्यो बभूव ह १२ सर्वेषां जनको
माता तथा सर्वप्रदायकः तत्र किं संशयं विप्राः कुरुध्वं ब्रह्मणस्पतौ १३ तस्य
तद्वचनं श्रुत्वा जगदंबामुवाच ह शंकरः क्रोधसंयुक्तस्तथा विस्मयमानं
द १४ शिव उवाच किं शक्ते वद शीघ्रं मा गणेशो भक्तिभावतः ता वयं
वयं पंचसमानाश्च तत्राधिकं न विद्यते १५ परस्परं च देवेशि भावयामो न
संशयः तेन किमधिकं देवक थ्यसे त्वं गणेश्वरे १६ मदिलंबोदरस्यायमेकोदं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

४३ वोन संशयः तस्मोदरात्समुत्पन्नावयं सर्वेषु निश्चितं १७ तदा धारस्तथांते वै तत्र
लीना भवामहे तदावयं मज्जामश्च जगद्ब्रह्मकथं वद १८ पालयामो हरामश्चा
धिकं भवति किमहः तथापि वेदवादेषु वयं लंवोदरान हि १९ अतो लंबोदरस्याद्वै
सामर्थ्यं महत् कीदृशं पश्यामस्त्वत्सन्निधाने पश्चात्तं प्रमज्जामहे २० य
दाधिकं प्रपश्यामस्तदा सर्वादिपूज्यकं सर्वपूज्यं करिष्यामो नान्यथा देवनि
श्चितं २१ ततः शिवश्च विष्णुश्च कल्पयित्वात्वपारकं नैवेद्यं समस्त संकल्यौ
पूजायां सस्थितौ परौ २२ एककालसमाविष्टावावात्मगणनायकं प्रपूज्य तु
महाभक्त्याब्जुल धर्मस्वरूपया २३ तत्र गणेश्वरः साक्षात्समायातः प्रजापते
दृष्ट्वापारं स नैवेद्यं विस्मितोभूत्सचेतसि २४ ध्यानेनालोकयद्विघ्नेशो ज्ञात्वा ४३

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तेषां हृदि स्थितं सत्यसंकल्परूपां सिद्धिमाकर्षसं[illegible] स्थितः २५ सिद्धिहीनो जीवो
विघ्नः पूजाभ्यां निरतौ मुदा नैवेद्यं गणराजाय दद्यतुः परमं ततः २६ एकग्रासेन नैवे
द्यमपारं गणनायकः एवमुक्तपुनरुक्ते च तौ क्षुधितौ हृं विशेषतः २७ तस्य तद्वचनं श्रु
त्वा त्रिवैविघ्नः पुनः प्रभू नैवेद्यं सत्यसंकल्पात्कल्पयामासतुः पुरः २८ तथापि
न च नैवेद्यं वभूवाणुस्वरूपकं तेन खेदसमायुक्तौ परस्परमथोचतुः २९ सत्यसंकल्प
रूपं यदैश्वर्यं च गतं परं आवां नरसमौ जातौ किं भविष्यति दैवतः ३० ब्रह्मणामीश्व
राणां च ब्रह्मत्वमैश्वर्यं महः सत्यसंकल्पभावाख्यं तेन हीना नराः स्मृताः ३१ अथ
नौ किं करिष्यावो जीवनं तु स्यान्न संशयः अयं लंबोदरः कोपान्तरके पातयिष्यति
३२ अथवा मृत्युलोके वै निश्चितं भयमागतं क्षुधावतारणं नाद्य छलना या

परायणौ ३३ इत्युक्त्वा संबोधितौ पूर्वं तत्र ज्ञानसमन्वितौ वादं कृत्वा महाविघ्न आवाभ्यां
प्रकटीकृतः ३४ अधुना ज्ञारणं श्रेष्ठं श्रमदं प्रभविष्यति गणेशस्य विशेषेण ब्रह्म
नायकरावसः ३५ ततस्तौ भक्तितुं तच्चक्रो घयुक्तो गजाननः बभूवाद्भुतरूपाश्च द
ष्ट्वा तु प्रपपाल तु ३६ ज्ञाते श्वारणमासाद्य पतितं भयविह्वलौ ततः सांत्वसमाश्वास्य
गृह्य तमाययौ प्रभुं ३७ प्रणम्य गणनाथं सा वाचं कृत्वा कृतांजलिः त्वद्दृष्टा मा च सर्वे ज्ञा भ हत्वा
क्ति नम्रात्मकं घरा ३८ शक्तिरु० क्षमा पुधरो मत्पुत्रं देवदेवेशो नमः त्वन्माया गर्व सं
युक्तयो विष्णुशिवयोः प्रभो ३९ त्व द्दराक्ससमुत्पन्नौ बालभावधरौ तथा शिव
विघ्नराजेनानयोर्दंडं च मा कुरु ४० सर्वे पापो परो स्वामिं स्त्वद्भक्तो नात्र संश
दी० यः त्व यपोषणं पूर्णं त्वमेव कुरुषे सदा ४१ एवमुक्त्वा महामाया तस्मै दुर्वा कु

ंददौ मनसाकल्पयामासान्नं चतुर्विधमुत्तमं ४२ ततो दूर्वांकुरेणैव तृप्तो
भूद्गणनायकः महाभक्तिं ददौ तस्मै ज्ञात्वायं भक्तवत्सलः ४३ प्रसन्नं तं गणाधीशं
दृष्ट्वा तत्र समाययौ हरिश्चन्द्रं करोद्देवः प्रणम्य प्राचतुर्वचः ४४ क्षमापराधमुग्रं
नौमि ह्यनयोर्विशेषतः त्वन्मायया गणाधीश नासद्गाखानं ददायक ४५ अधुना
ते स्वरूपं यत् ज्ञातं पूर्णं महाप्रभो सर्वादिपूज्य एकस्त्वं सर्वपूज्यो यथातथं ४६
एवमुक्त्वा गणेशानं तुष्टवतुर्महेश्वरौ अथर्वशिरसा भक्त्या संतुष्टः सन्ततोऽभ
वत् ४७ ज्ञात्वा संप्रार्थितस्तत्र भावयुक्तेन चेतसा यथापूर्वं शिवे विष्णुस्त्वाद्
ज्ञौ तौ चकार ह ४८ संकल्पसिद्धिसंयुक्तो बभूवतुर्हरीश्वरौ सदा भक्तिसमायु
क्तौ भजन्तौ गणनायकं ४९ संज्ञायेन विहीनाश्च जाता देवर्षयो जनाः पूर्णं

मो० पु०   खं० ५

भावयुक्तं ढुंढिमभजंस्ते विमत्सराः ५० न गणेशात्परं किंचित्तस्माद्दादौ गणे
४५ श्वरः अंतेसौ पितृसंदेहो मध्ये नानाविधः स्मृतः ५१ सर्वेषां वीजरूपोयत्ततः
९३ सर्वादिपूज्यकः संपूज्य गणेशानो वेदेषु कथितो भवत् ५२ गाणपत्यास्व
भावस्थावभुवु मुनयोमलाः यत्र तत्र गणेशानं भजंते तेधुनाप्रभुं ५३ शतेत्
लंबोदरस्यैवं चरितं यः शृणोति वा पठति तस्य विघ्नेशः सर्वदः प्रभविष्यति
५४ इति श्रीमद्गांत्ये मौद्गले० पं० लं० त्रिवविघ्नगर्वहरणं नाम चतुर्दशो ९४
ध्यायः १४ मुद्गल उ० सुरर्षीनामराजर्षिः प्रधानैर्नयवर्जितैः वलिष्ठैःपी
डितोत्यंतंराज्यं त्यक्त्वावनं ययौ १ तत्र मुनिवरेशौवोपदिष्टः शांतिमाभजत्
तस्याश्च कृपया राजा समर्थः प्रबभूव ह २ स्वराज्यं प्राप्य राजर्षिश्चकार च ४५

र्मसंयुतः अभजच्छक्तिमत्यंतं भावयुक्तेन चेतसा ३ ततो मृतः पुनः सोपि सावर्णिश्च
बभूव ह मनुर्भानुसुतो दक्षसर्व मान्यन्तराधीः ४ पूर्वसंस्कारयोगेन शक्तिभक्तो
बभूव ह वने गत्वा महाशक्तिं पूजयामास नित्यदा ५ तपोषणसमायुक्तस्तताप
तपउत्तमं ध्यात्वा ल्हदि महामायां नवार्णजपकारकः ६ माहात्म्यमपठन्नित्यं
शक्त्या भक्तिसमन्वितः एवं वर्षशते पूर्णे प्रसन्ना भून्महासती ७ अत्यंततपसा
समायुक्तं ध्यानमार्गपरायणं ज्ञात्वा लंबोदरस्तत्र वरदा नाम[illegible]पयौ ८ तस्य हृ
दि स्थितं ध्यानं शक्तेस्तत्र गणेश्वरः शुशुभे रक्तवर्णाभो दृष्ट्वा तं सापि विस्मितः
९ ततः शक्तिस्वरूपं संदर्श पुनरंजसा पुनर्लंबोदरं देवं पुनः शक्तियुतं प्रभुं १० वं२
द२ वामांगसंस्थितां शक्तिं हावभावसमन्वितां भक्तियुक्तां गणेशस्य ततो ति वि

स्मितोऽभवत् ११ शक्तिश्च कृ पया दक्षलंबोदरार्थजं महत् ज्ञानं प्रकटरूपं तद्बभूव
तद्बुद्धिमतो १२ ततो मनुर्विशेषेण भक्तियुक्तो हृदि स्वपं विचारमकरोत्पूर्णं तच्छृणु
प्रजापते १३ लंबोदरः स्वयं शक्तिः शक्तिर्लंबोदरात्मिका शक्तिर्लंबोदरास्येवेनां
तरं विद्यते कदा १४ शक्तिर्वामांगसंभूता दक्षिणांगाद्गणेश्वरः तयोरभेदभावेपतत्
ब्रह्मस्वानंदसंज्ञकं १५ क्रीडार्थं भक्तरक्षार्थं देहाकृतिधराविमौ बभूवतुर्नसं
देहस्ततः सर्वमिदं बमौ १६ एवं विचारयुक्तो सौ यावन्मनुः प्रतापवान् तावत्तौवा
हिरायातौ वरदौ च प्रजापते १७ स विस्मितो हृदि संस्थो गतो शक्तिविघ्नपौ पुनर्ध्या
नबलेनैव चिंतयामास भूमिप १८ ततस्तौ ताकुचतु वैवरं वरय सुव्रतं तप
सा भक्तिभावेन तुष्टौ दास्याव हे मनो १९ तयोर्वचनमाकर्ण्यान्मी ल्या पत्रपद्दे

ह्रिर्मंत्रः दृष्ट्वा शक्तियुतं देवं प्रणनाममुदायुतः २० पूजयित्वा विधानेन तु ध्यावभ
क्तिसंयुतः प्रणम्य तो पुनर्देवौ कृत्वा करपुटं विधे २१ सावर्णिरू० नमस्ते गणनाथा
येनमस्ते गणपालक चतुर्बाहुधरायैते चतुर्बाहुधरायच २२ अनाद्यायैस्वना
द्यायपरेशायैपरात्मने भक्तविघ्नहरायैते भक्तविघ्नहरायच २३ हेरंबायनम
स्तुभ्यं हेरंबायनमोनमः लंबोदरस्वरूपायैलंबोदरायते नमः २४ [redacted]
[redacted] नानारूपधरायैते नानारूपधरायच नमोनमो महादेव्यै देवाधिप
तयेनमः २५ गजवक्त्रधरायैते गजवक्त्रधरायच शूर्पकर्णस्वरूपायै शूर्प
कर्णायुते नमः २६ एकदंतधरायैचैकदंतरूपिणे नमः मायामोहहरायैव
मोहहत्रे नमोनमः २७ स्वानंदपुरसंस्थायै स्वानंदवासिने नमः पराध्यादिध

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

यैवपरश्वादिधरायते २८ नमः सर्वप्रबोधायैनमःसर्वप्रबोधक मायिभ्यो मोह
दात्र्यैतेमायिभ्योमोहदायच २९ ढुंढिराज्ञ्यैनमस्तुभ्यं ढुंढिराजायते नमः वक्र
तुंडधरायैतेवक्रतुंडायतेनमः ३० सर्वादिपूज्यकायैचसर्वादिपूज्यकायते न
मस्तेसर्वपूज्यायैसर्वपूज्यायतेनमः ३१ अनंतखेलकारिण्यैत्यनंतखेलका
रिणे नमोनमोमहाशक्तिशक्तिधरा यतेनमः ३२ नानाभेदकरायैतेनानाभे
दमयायच नमोनमः परेशायै परेशायनमोनमः ३३ याशक्तिः सैवविघ्नेशो
नांतरं विद्यतेक्वचित् अज्ञानेनमहाभागोस्त्रीपुंभावःप्रदृश्यते ३४ यत्र
वेदादयोदेवेशायोगिनोविस्मिस्मिरे तत्रकोहंस्तवामितावल्पज्ञानप्रधारकः
३५ अधुनामेमहायोगंप्रयच्छयोनमाम्यहं भक्तिंचभवतोर्मेतुसुदृढां

दातुमर्हथः ३६ इत्युक्त्वा दंडवद्भूमौ पपात पादयोस्तयोः स्तोत्रहर्षसंयुक्तावूचतुस्तं
महीपतिं ३७ शक्तिविनायकावूचतुः शांतियोगं महाभाग लभसे योगसेवया
भक्तिं दृढां च नैपादे सदादिसकुमारक ३८ भुक्त्वा मन्वंतरं पूर्णं यज्ञाः स्थाप्य ज
गत्त्रये अंते स्वानंदगो भूत्वा ब्रह्मभूतो भविष्यसि ३९ त्वया कृतमिदं स्तोत्रं सर्वसि
द्धिप्रदायकं पठते शृण्वते चैव भविष्यति न संशयः ४० एवमुक्त्वा गणाध्यक्षा
वंतर्द्धानं प्रचक्रतुः मनुः स्वगृहमागत्य भजते भावसंयुतः ४१ मन्वंतरं समा
भुक्त्वा ब्रह्मभूतो बभूव ह गाणपत्यो महाभागः सावर्णिः प्रथितो भवत् ४२ शा
क्तिविनायको नामावतारः कथितो मया सर्वसिद्धिप्रदः पूर्णो लंबोदरस्य भक्ति
तः ४३ मायया मोहिता नानावैभिन्नाः शक्तिः प्रदृश्यते यामकिं सा स्वपदक्षलंबोद

मौ०पु० रोनसंशयः ४४ स्त्रीपुंभावमसौमायात्सकव्यायोगसेवया तदालंबोदरःप्रा खं०५
४८ प्तोयोगिभिर्ब्रह्मनायकः ४५ केचिच्छक्तिंवदंत्येनंकेचिल्लंबोदरंपरं भक्त्या
भिन्नस्वरूपंचार्थज्ञानीहिनात्रसंशयः ४६ असत्स्वानंदरूपावैशक्तिर्वेदप्रकी
र्तिता सलंबोदरआख्यातोगणेशस्यावतारभृत् ४७ शक्तिविनायकस्यैतच्च
रितंयःशृणोतिवा पठतिभवितासोपि भुक्तिमुक्तिर्नसंशयः ४८ इतिश्रीमदांत्ये
मौद्गले० पं० लंशक्तिविनायकमाहात्म्यंनामपंचदशोध्यायः १५ मुद्गलउ० शे
षपुत्रस्यमाहात्म्यंकथयामिसमासतः तच्छृणुष्वप्रजानाथयोगशांतिप्रदायकं प.३
१ एकदासत्यलोकस्थोब्रह्माध्यानपरायणः बभूवसर्वजंतूनांहितार्थेमोहि
तःस्वयं २ सदासृष्टिर्मदीयेयमखंडाजायतेकथं तत्रतस्यस्वनिःश्वासात्पुरु ४८

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

षः सबभूवह ३ सप्रणम्यविधातारंतुष्टावविविधैः स्तवैः तमुवाच तदा ब्रह्मा किं
वांछसि वद शोभने ४ ब्रह्मणोवचनंश्रुत्वा हर्षयुक्तः पुमानभूत् तंजगाद प्रजाना
थं भक्तिनम्रात्मकंधरः ५ पुमानुवाच० त्वनिश्वाससंभूतं पूत्रं मां पालय प्रभो
देहिनामत्र यास्त्रीनं भक्ष्यं [illegible] नानाविधं विधे ६ अत्यसुखकरं सर्वे देहिनाश्चन
मोस्तुते त्वं गतिः सर्वभूतानां ममाधुना विज्ञापतः ७ तस्यद्वचनं श्रुत्वा ब्रह्मा स्नेह
युतोभवत् तमालिंग्य चुचुंबे सजगाद पुत्रवत्सलः ८ ब्रह्मोवा० मा यादर्शनमा
त्रेणवर्द्धयसि [illegible] माहात्मन्त्र अगस्तिनामविख्यातं मायाकरो भविष्यति ९ यंयं मि
च्छसि तं तं ते सफलं च भविष्यति त्रैलोक्ये यवसत्तिः पुत्र आहतगतिर्भवेत् १०। व्या २
चतुः पदार्थसंभूतं सदा वस्तुं भविष्यति चतुर्विधमयेभ्यो स्मार्गं न कदा भवेत्

२

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

११ युद्धे चतुर्विधं सर्वं ज्ञापिष्यसि न संशयः सदारोग्यादिसंयुक्तो भविष्यसि म
द्वात्मज १२ ब्रह्मणो वचनं श्रुत्वा हर्षितो भूत् सुमानस्वयं मायाकरः प्रणम्यैव
तं ययौ स्वेच्छया चरन् १३ ततो दानवमुख्यश्च विप्रचित्तिः प्रतापवान् तं दृष्ट्वा ब
लसंयुक्तं समागत्य ननाम सः १४ ज्ञात्वा वृत्तान्तमेतस्य मायाकरस्य दुर्मतिः ज्ञ
गाद तं पुनः सोपि विप्रचित्तिः प्रतापवान् १५ विप्रचित्ति रू॰ मायाकर महाभा
ग शृणु मे परमं वचः धराः प्राप्तास्त्वया सर्वे दुर्लभा नात्र संशयः १६ तेषां भोगाः
प्रकर्त्तव्यास्त्वया नित्यं महामते तदा शोभायुता ज्ञाता वरास्ते नान्यथा प्रभो १७
यथा रूपवयोयुक्ता नारी स्वपतिना युता नित्यं भुक्ता विशेषेण शोभते [illegible] तीव मा
नद १८ मिलिता विविधा भोगा भुक्ताश्चेत्साधवं भवेत् निष्फला भोगहीनास्ते

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्रापंति पुरुषं सदा १९ अन्तो वरान्महाभाग साधयस्व विशेषतः नो चेत्ते त्वां त्रापिष्यति
[illegible] वरा भोगविहीनतः २० वयं दानवमुख्याश्च त्वदधीना भवामहे अस्माभिर्बल
संयुक्तैर्भुंक्ष्व भोगं महाबल २१ दानवा [illegible]बलसंयुक्ता अजेयाः सर्वभावतः त्वदाज्ञाव
शा[illegible]गा नाथ चरिष्यन्ति न संशयः २२ एवं मायाकरस्तेन बोधितो दृष्टधीः स्वयं तदा
धीनो बभूवापि ययौ तेन रसातलं २३ तत्र दानवमुख्यैश्च मिलितैर्यमसन्निभैः तै
र्मान्यते विविधैः पुत्रो मायाकरस्ततो बहु २४ ततः शुक्रं समानीय प्रणम्य दानवा
विधे ब्राह्मणे[illegible]ऽभिषिक्तं तं कारयामासुरादरात् २५ असुराणां महाराजो बभूव ब्र
ह्मणः सुतः मायाकरोति सर्वेभ्यः शश्वमेभयदायकः २६ नानाभोगान्प्रभुंजानो बले
[illegible]नगर्वितो भवत् अमन्यतासुराधीनम् आत्मानं कृतकृत्यकं २७ ततो दानवमुख्यैः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सजीत्वापृथ्वींसमागतं ततोदेवगणानजित्वेंद्रासनसंस्थितोभवत् २८ ततस्तं
दानवाःसर्वेमिषेविरेविशेषतः स्वर्गभोगकराभूत्वाहर्षितास्वजनेश्वमो २९ ततः
शिवंसमाराध्यमुद्धायसोद्युतोभवत् त्यक्त्वाकैलासमाद्देशमपपालशंकरःस्वयं ३०
ततोविकुंठगोभूत्वाराजादानवाधिपः त्यक्त्वाविकुंठमेवंसविष्णुःपपालभीति
तः ३१ ततःशांतिपरेंवीक्ष्यतमूचुर्दानवाःपुनः जयत्वंसर्वलोकस्थंब्रह्माणंदे
वनायकं ३२ सुरेभ्यःसर्वदातासपक्षगश्चपितामहः असुराणामहोद्धंतानसंमो
वर्तते कदा ३३ तमाश्रित्यमहादेवादयोभवंश्चसंस्थिताः कालंप्राप्यमहावे
गामारयिष्यंतिनःखलु ३४ त्वयासर्वेजितंराज्यं तदपिपप्रपचेष्टितं [redacted]
प्राप्यमहावेगामारयिष्यंतिनः ब्रह्मणादत्तवर्येणसकृतोनकदाभवान् ३५ त

व॰

ततस्तेषां वचः श्रुत्वा [redacted] तेमागतं विष्णुंवैविधिः त्रैलोक्यपालकैः [redacted] मा पाकरो सुरः स्वयं सत्यं विचार्य धातारं जेतुं संघातो भवत् ३६ मु
दानवैर्ब्रह्मलोकेन मागतं विष्णुवै धविधिः त्रैलोक्ययुतःपपालकसो देवाद्यः संवृतः
प्रभुः ३७ ततः सत्यलोकस्थः श्रुश्रुमेतो वचनस्मृणात् दानवा न्मान्यदैत्यान्ना
स्तैः सहबुभुंजे सुखं ३८ ततः ससत्यलोके च कैलासवैकुण्ठ पदे सौरस्नात्केन्य
देवानां पदे प्यस्थापयत्स्वकान् ३९ पुनर्भूमौ समागम्य संस्थितो नगरे स्वके
प्रपंचारव्यं महादैत्यो दैत्यपैः संवृतो बभौ ४० ततो दानवमुख्याश्च पातालं जय
ने सुरः पा प्रस्थापयच्च ते सर्वे गता नागवंसमन्विताः ४१ ते र्जिताः सर्पदाज्ञानः नृप
स्तांश्च रणं ययौ स्वीकृत्य काराभारं स संस्थितो नागपेर्वृतः ४२ तथापि दानवा

५१ स्तत्रसंस्थिताभयदायकाः नागानघर्षयन्सर्वे यमकालनिभाबलात् ४३ ततो
तिदुःखितः शेषस्तस्मार गणनायकं निर्विघ्नार्थं प्रजानाथ पुत्रभावार्थमादरा
त् ४४ अनंतध्यानेन विघ्नेशं तोषयामास नागपः ततो वर्षे गते पूर्णे प्रकटो भूद्ग
जाननः ४५ हृदयाद्बहिरेवासौ निर्गत्य तमुवाच ह पन्नगशेषं मुद्गला भागध्यान
ज्ञं नेमुत्तं चमां ४६ दक्ष उ० स्वल्पापापासेन ह्रेरंबः कथं पुत्रो पभूद्धे कथयस्व महा
योगिन्द्रेषस्य चरित्रं महत् ४७ ॐ इतिश्रीमदांत्ये मौद्गल० महा० पंचम० लंबो० शे
षतपोवर्णनं नाम षोडशोध्यायः १६ [illegible] श्रीगणेशायनमः मुद्गलउ
वाच पुराकश्यपविप्रेणाराधितोतपसा प्रभुः शिवविष्णुच पूजार्थं मंत्रध्या
नसमाधिना १ दशवर्षे गते तो च वरदो तं समागतो तत्र तो मुनिवरेणैव वंद

त्वाप्रजागमन्‌ः २ तयोर्वंशेनशेषश्च पुत्रस्तस्य बभूव ह धराधरणभावेन पाल
को विष्णुरेव सः ३ ब्रह्मणादिवसांते सत्वालयाविष्टपं महत् ददाहसूर्यंकरांज्वा
श्च महानागप्रतापवान् ४ सहस्रशीर्षापुरुषः स एकः शेषउच्यते मृत्यहीनो
ह्यनंतोयं सर्वेषामंतकोभवत् ५ लये एकोवशेषश्चतेन शेषः प्रकीर्तितः ब्रह्मां
डं धारयामास सर्वाधारो बभूव ह ६ उत्पन्नोभूत्स्वयं साक्षाद्धरिहरात्मकप्रभुः
ब्रह्मणागत्य तत्रैवाभिषिक्तोराज्यकर्मणि ७ नागानामीश्वरोभूत्वा स्थितः स
र्वैत्रसंमतः ततः सकल्परूपं नत्वाजगादवचनं हितं ८ शेष उवाच ब्रह्मांडं धा
रयाम्येवकथं सर्वं समाकुलं तदर्थं मां महायोगिन् साधिशिष्यं पितः प्रभो ९
ततस्तस्मै मुनिश्रेष्ठो ददौ मंत्रं षडक्षरं गणेशस्य यथान्यायं शेषोपि त्वा प्रजा

पते १० ततस्तं प्रणिपत्यैव ततताप ततपङ्कजमं वनेगत्वा गणेशं स ध्यात्वा जपपराय
णः ११ निराहारेण विघ्नेशं तोषयामास नित्यदा पुपूज भक्तिसंयुक्तस्तुष्टाव विवि
धैः स्तवैः १२ एवं वर्षसहस्रेण प्रसन्नो गणनायकः अस्थिमात्रावशेषं तं त्व
चायुक्तं समाययौ १३ तं दृष्ट्वा नागपः शेषः प्रणम्योत्थाय चादरात् पुपूज हर्षसं
युक्तस्तुष्टाव करसंपुटः १४ ततस्तं गणराजः स जगाद वृणु वांछितं दास्यामि
तपसा तुष्टोयं ते नैव ने भविष्यति १५ शेषः प्रणम्य विघ्नेशं जगाद हर्षसंयुतः
ब्रह्मांडधारणे शक्तिं देहि नाथ नमोस्तु ते १६ भक्तिं देहि गणाध्यक्ष भुक्तिमु
क्तिप्रदायिनीं मृत्युहीनं दिशानाथं मां कुरुष्वः पत्रो द्विगं १७ तथेति गणरा
जस्तं तमुक्त्वांतरधीयत शेषोतिहृष्टः स्वयं दक्षस्वस्थानं प्रजगाम ह १८ तद

रम्यस्वयंनागो धराधरो बभूवह दिक्पालस्त्वं सदा लोके मान्यः सर्वार्थदो भव
त् १९ ततो योगबलेनैव नानामायाविशारदः नानारूपधरः शेषः स्वस्वमेस
र्वमंडलं २० एवं बहुगते काले हिरण्यकशिपोर्भयात् ऐश्वर्यं नैश्वर्यं मत्वा ज्ञा
ग्रा० ४ नार्थमुद्यतो भवत् २१ विपुलं सत्तपस्तप्त्वा श्रीमद्धर्मपरायणः योगभूमिस्थ भावे
९५ नांतर्निष्ठो बभूवह २२ ततः क्रमेण नागेशः समस्तानंदगो भवत् योगेन तत्र
शांतिं दृष्ट्वा च संस्थितो भवत् २३ विष्णुं ज्ञात्वा परभावेन तद्ध्यैसंयतः स्वपं चै
दस्वेनैव मार्गेण तोषयामास केशवं २४ ततस्त्वं वरदो विष्णुर्य [illegible] योंणसं शूपे ३
स्तुतः याचितो नित्यमेवं मे दर्शनं देहि केशव २५ मदीयदेहसंस्थस्त्वं भव
नित्यं जनार्दन तथेति तमुवाचासौ नारायणो बभूवह २६ शेषशायी सदा त

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्यदेहे स संस्थितोऽभवत् तेन संहर्षितोऽत्यंतं बभूव नागपालकः २७ ततो यो
गबलेनासौ मायामोहं ददर्श ह दृष्ट्वा मयं समानं दर्शं सोऽपि बभूव ह २८
एवं बहुगते काले योगमार्गकरोऽभवत् समाधीना प्रज्ञानाथ सोऽहज्ञं ब्रह्मसंप्रि
तः २९ सोऽहज्ञं शंकरं ज्ञात्वा शैवमार्गपरोऽभवत् ब्रह्मस्वेच्छामयं दृष्ट्वा शांति
प्राप्य समास्थितः ततस्तं वरदः शंभुः नागयोगे प्रणम्य सः शेषस्तुष्टाव संहृष्टः
शैवैः स्तोत्रैः सदाशिवं ३१ प्रसन्नं शंकरं दृष्ट्वा ययाचे भक्तिमुत्तमां सदा दर्श
नभायार्थं संगतिं शंकरस्य सः ३२ तथेति शंकरो देवश्चकार स प्रजापतेः
मस्तके तं बबंध अथ नित्यदर्शनकांक्षिणं ३३ ततोऽतिहर्षितोऽनंतः शंभुमार्गप
रायणः सिषेवे भावसंयुक्तः शंकरं वृषभध्वजं ३४ ततो योगबलेनैव शेष

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्वात्मस्थं परं मोहहीनं विदित्वा सर्वशान्तिहीनो बभूव ह ३५ मनसा शोकरं ब्र
ह्मामन्येतनपरं प्रभुं शिवं नत्वा महानागाः पप्रच्छ योगशान्तिमिदं ३६ पात्रं गणे
शयोगेनं ज्ञात्वा शेषं सदा शिवः जगाद गणनाथस्य ज्ञानं सर्वहितावहं ३७।
शिव उवाच योगं शान्तिप्रदं पूर्णं गणेशं विद्धि मानद सत्यासत्यसमानानि स
हजेन युक्तानि वै ३८ ब्रह्माणि यत्र लियंते संयोगेन महात्मना स्वसंवेद्यं वदं
ति तद्ब्रह्म शान्तिप्रदं परं ३९ संयोगे गणनाथस्य स्वसंवेद्यात्मकं परं दर्शने
जायते येन स्वानंदवासिको भवेत् ४० सर्वसंयोगरूपश्च देवस्तत्र महास्मृ
तः तेन शान्तिप्रदं पूर्णं न मतं योगिभिः कदा ४१ स्वसंवेद्यविहीनं यद्ब्रह्मा यो
गमयं भवेत् तत्र सं दर्शनं तस्य न भवेच्छान्तिरेकतः ४२ स्वकीयो भवत्त

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्तत्र निवृत्तिर्जायते नृणां तत्र शांतिः समाख्याता सा न मुख्या मता बुधैः ४३
अयोगात्मकदोषश्च तत्र संवर्त्तते सदा मायाहीनप्रभावेण तिष्ठति गणना
यकः ४४ संयोगायोगयोर्योगे योगं ति शांतिप्रदायकः सा शांतिः सर्वमान्या वै
भवति विद्यादतः ४५ संयोगश्च गकारस्थो णकारो योगगः प्रभो तयोरी
शो गणेशानो वेदे परूप विचक्षण ४६ पंचभूमिमयं चित्तं तद्देव बुद्धिभावगं॥
मोहो भ्रांति प्रदेशेषु सा सिद्धिः संमता बुधैः ४७ तयोः स्वामी गणेशानश्चिं
तामणिः प्रकथ्यते चित्तप्रकाशकः साक्षात्स्थितिदो योगसेवया ४८ तं भ
जस्व माहात्मनागततः शांतिमवाप्स्यसि नान्यथा कोटिवर्षैः शांतिप्रल
भ्यते नरः ४९ एवमुक्त्वा महादेवो विरराम सतां प्रभुं प्रणम्य शेषनागश्च

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यमोत्तपावनंपरं ५० इति श्रीमदांते मौद्गले० पं० लंबोदरचरित्रे शेषयोगो ना
मसप्तदशो ध्यायः १७ मुद्गल० ततः शेषस्वरूपं तत्र ज्ञात्वा पतगोत्तमं शमदमपरो भू
त्वा योगभूमीमधः शेषो यत्न १ क्रमेण पंचभूमीनां चित्तस्य पारमागतः शांतिप्रा
प्तो महानागो भक्तं गणनायकं २ गाणपत्यस्वभावेन पुपूजे भक्तिसंयुतः एवं त
पःप्रभावेण संतुष्टोऽभूद्गजाननः ३ नमाय यो महाभक्तं ध्यानस्तिमितलोचनं उ
गाद्संदृशं धवलं वरान्मत्तो मुदुर्लभान् ४ तस्य तद्वचनं श्रुत्वा प्रबुद्धो नागनाय
कः दृष्ट्वा लंबोदरं देवं प्रणनाम कृतांजलिः ५ पुपूजे भक्तिसंयुक्तः पुनः प्रणम्य
विघ्नपं तुष्टाव सुस्थिरो भूत्वा निबद्धकरसंपुटः ६ शेष उ० गणेशाय नमस्तु
भ्यं सिद्धिबुद्धिपते नमः चिंतामणे महाविघ्ननाशनाय नमो नमः ७ सर्वा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दि पूज्यरूपाय सर्वपूज्याय ते नमः ज्येष्ठराजाय ज्येष्ठानां मात्रे पित्रे नमो नमः
८ विनायकाय सर्वेषां नायकाय नमो नमः नायकानां प्रचालाय नायकेभ्यः सि
विताय ते ९ विघ्नेशाय च सर्वेषां पदस्वं त्राकराय ते अभक्तानां सुभक्तानां
जा॰४ विघ्नहंत्रे नमो नमः १० ढुंढिराय सर्वेश्च ढुंढिताय सुसिद्धिदे ढुंढितानां महा
राजाय परेशाय नमो नमः ११ ब्रह्मणां पतये तुभ्यं ब्रह्मभ्यो ब्रह्मदायिने ब्रह्म
भ्यः सुखदायाथ शांतिरूपाय ते नमः १२ स्वानंदवासिने तुभ्यं सदा स्वानं
दमूर्तये नानाविहारकर्त्रे ते समाधयेन नमो नमः १३ मूषकवाहनायैवं के मूषक॰३
प्रियमूर्तये मूषकध्वजिने तुभ्यं स्तेयरूपाय ते नमः १४ अयोगाय सदा ब्र
ह्मब्रह्मणे ब्रह्ममूर्तये असमाधिस्त हेरंब मायाहीनाय ते नमः १५ योगा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

योगनाथाय योगेभ्यो योगदायिने चित्तवृत्तिविहीनाय ते नमः गणेशाय
नेमौ नमः १६ किं स्तौमि त्वां गणाधीश मनोवाणीविवर्जितं मनोवाणीमयं
स्वामीन्दृष्ट्वा भ्यां हीन तयास्थिते १७ अतो वेदादयः सर्वे कुंठिता नात्र संशयः यो
गीनः शुकमुख्याश्चात स्त्वां परूपामि भाग्यतः १८ एवं संस्तुवनस्तस्य भक्तिरसः
समुद्भवः तेननर्तेशोषश्चल्ह ष्टरोमाश्रुलोचनः १९ ततस्तं गणराजस्तु जगा
द भक्तिमुत्तमं वरान्वरय शेष त्वं दास्यामि भक्तभावतः २० त्वया कृतमिदं स्तो
त्रं शांतियोगप्रदं भवेत् धर्मार्थकाममोक्षाणां दायकं सर्वसिद्धिदं २१ यं य
मिच्छसि तं तं वै दास्यामि स्तोत्रपाठतः श्रवणान्मात्र संदेहो मद्भक्तिवर्द्धनं भ
वेत् २२ ततस्तं नागराजश्च जगाद वचनं हितं प्रणम्य भावसंयुक्तो विघ्नेशं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

भक्तिलालसं २३ शेषउवाच भक्तिं देहि गणाधीशत्वपादांवुजे परां सदा
शांतिस्थमत्यंतं कुरुष्व गणनायक २४ चित्तं पंचविधं प्रोक्तं तत्र त्वं सततं प्र
मो तिष्ठस्व स्फूर्तिरूपेण मदीयम्ममनाशकः २५ मनश्चंचलभावेन संसा
रविषये रतं भविष्यति न संदेहो ततस्त्वं मे तनयो भव संसारे पुत्रभावेन भ
जिष्यामि निरंतरं हृदि शांत्या तथा देव कुलदैवतरूपिणं २७ अत्र गणे
शाक्षेत्रैवैभवंतु त्वत्प्रसादतः सर्वसिद्धिप्रदं नाथ भक्तिम्मः शांतिदायकं
२८ चित्तभूमी धरं वीक्ष्याहं शांतोत्र गजानन धरणीधर संज्ञं त्वां वदिष्य
ति जनाः प्रभो २९ योगेनाहं गणाध्यक्ष तद्रूपो नात्र संशयः अतो मदी
यनाम्ना त्वं धरणीधरको भव ३० अहं धरा धरः प्रोक्तः स्थूलशब्दप्रधा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

+२क॥ त्वं चित्तभ्रमिणः स्वामिन् योगेन धरणी+२

धरः ३१ एवमुक्त्वा गणेशानं विरराम चकार तपः तमुवाच गणाधीशः संतु
ष्टो भक्तवत्सलः ३२ गणेश उ० त्वयोक्तं सकलं शेष फलं ते भविष्यति स
दा शांतिस्वरूपस्य मां भजिष्यसि निश्चितं ३३ योगज्ञानस्य कर्ता वै त्वं
भविष्यसि मानद न योगे त्वत्समः कोपि भविष्यति महीतले ३४ सदा भक्तिर्मयि मर्४
ता त्वं मे नाग मौलिष्ठ धराधर महीनस्वाभावेन भज स्व मां विशेषतः।
धराधरणाद् त्वं वै क्षमादिकं कदाचन न भविष्यति शेषसर्पेण समाभ तैर्४
वेत ३६ तव विष्णुः शरीरस्थः शायते निस्समादरात् पुष्पतुल्यो भवेद्देवो ब्र
ह्मांडनायकोपि सः ३७ सदा पर्यंकेषु भोगस्त्वं भविष्यति न संशयः दिक्
पालस्त्वं महाभाग सर्वमान्यो न संशयः ३८ एवमुक्त्वा गणाधीशस्त्वरूपं ना

नाविधं स्वकं दर्शयामास शेषाय नानायोगधरं परं ३९ समष्टिव्यष्टिरूपं च
५० ददर्श नादरूपकं बिंदु सोऽहं तथा बोधं विदेहं नागराट् प्रभो ४० स्वस्वरूपमयो
गस्थं योगशांतिमयं तथा ददर्श विस्मितः शेषः संशयवर्जितो भवत् ४१ अंतर्धा
नं पर्यौ स योगाधीशो ब्रह्मनायकः शेषस्तत्र गणेशं संस्थापयामास विप्रपैः ४२। शा ✓
धरणीधरविघ्नेशस्तत्रैव संस्थितो भवत् भक्तेभ्यः सिद्धिदाता स यात्रामात्रेण
निश्चितं ४३ शेषः स्वभुवनं दक्ष जगाम हर्षसंयुतः विघ्नराजस्य नाम्नो च तिष्ठ।
ति नागराट् सदा ४४ अनन्यो भावसंयुक्तो भजंतं गणनायकं अथो व्यासावता
भे २ रश्च बभूव धर्मपालकः ४५ ब्राह्मणः शूरणं नाम गाणेशः श्रुश्रुवे मुनिः पुराणं सत्त
थापि च समभक्तस्तपसा युतः ४६ प्रसन्नो गणराजः स्यात्तस्मै दत्वा यथो वरं वेदशाखा ५७

भि० १ द्विकं सर्वं चकार [illegible]न्नमादरात् ४७ ततो बहुगते काले मायया श्वांति संयुतः योगाभ्य

सो भव योगी चित्त चंचल भावतः ४८ कदा नदी जले व्यास स्तर्पणं नित्य माकरो

त् तस्यां जले स्वयं शेषः [illegible] पपात स्मै से रूप धृक ४९ तं दृष्ट्वा विस्मितो व्यास स्तस्या

ज्जलाज्जले भयात् मुनिं तं प्रत्युवाचेदं सर्पो गुष्ठप्रमाणकः ५० सर्प उवाच० ज्ञलेना

नाम [illegible]ग्रहो प्राश्च प्रगम सिष्यति मां प्रभो [illegible] रक्षस्व त्वं महाभाग शरणं ते समाग

तं ५१ तच्छ्रुत्वा विस्मितो व्यासस्तं प्रणम्य महायशाः जगाद हर्षसं[illegible]युक्तो वचनं ६४

स्वहितावहं ५२ व्यास उ० कस्त्वं वद महाभाग मम्मांजलौ समागतः वदसि [illegible]रव न ३

न्नाप्यनलां ज्ञाना मिभावतः ५३ तस्य तद्वचनं श्रुत्वानंतं जगाद पतंजलिः हर्ष

यन् हेतुगर्भाभिर्वाग्भिर्हर्षसमन्वितः ५४ चिंतनं यदि संत्यक्तं [illegible] कुत्र प्रव[illegible] तदा १

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तते अपूर्वं मुनिशार्दूल मायया पृच्छसि प्रभो ५५ मायया मम [illegible]र्पं जानाति स्थो नर
चन्द्रार्षणं सदा करोति नात्र संदेहो ह्येन यानन्दुर्लभं भवेत् ५६ तस्यैतद्वचनं श्रु
त्वा पुनः प्रणम्य तं मुनिः पप्रच्छ ते स्वरूपं मे दर्शयस्व नमो नमः ५७ ततो नरा य३
कृतिं मूर्त्वा संस्थितो भगवान्स्वयं शेषो ब्राह्मणरूपस्थो जगाद तं महामुनिं
५८ पतितं जलिरुद्धं तवांजलौ महाभागपतितो हं तापते पतं जलिं च मां वि द्वि५
द्धि [illegible]शेषं धराधरं मुने ५९ गणेशानेन विप्रेशा प्रेरितं मां विशेषतः श्रा
तिनाशार्थमेवं ते ज्ञानीहि सह मागतं ६० ज्ञात्वाति हर्षितो व्यासः प्रणम्य
तमुवाच ह चिंतनं च कथं नाथ स्वतः कथ्यं चित्तगते ननु ६१ नानाभावमिदं
दृष्ट्वा तत्र तत्ता दृष्टां भवेत् चिंतनाग्रे द्रवं यत्नं वदस्वाति महाद्भुतं ६२ यो ५२

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

२

गास्त्रं गणेशः स्वयं तस्मै जगाद स संपतंजलिः यथा विघ्नेश्वरेणैव दर्शितं तेन तादृशं परं
विप्रेणेति हृष्टो योगी गणेशः सर्वार्थदायकः व्यासस्तत्र प्रज्ञानाद्यखेदयुक्तो
भूदेवह ६४ अश्वावसयथा ज्ञानस्त्रं परं गणेशमुखात्पुरा तथाचितं समागृह्य
योगीवंद्यो बभूवह ६५ तस्य भाष्यं च कारापि व्यासो गूढार्थसिद्धये नराणां प्र
हृतार्थाय सुगमार्थं प्रजापते ६६ पंचधा चित्तभूमिस्थ स्त्यक्त्वा तच्चिंतनं
स्वयं चिंतामणिं तदाकारो बभूव मुनिसत्तमः ६७ इदं गणेशस्य माहात्म्यं क
थितं योगजं तिदं अधुना शृणु दक्ष त्वं प्रवक्ष्यतं यत्कथानकं ६८ इति श्रीमद्
गणेशो मौद्गले पंचमखंडे॰ लं॰ गणाधीश्वाख्यानवर्णनं नाम अष्टादशो ध्यायः मुद्गल
उ॰ ल्हद यथा बहिरागस्य गणेशस्य गणनायकः पुत्रभावेन संस्थो भून्मूषकारूढ

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

आदरात् १ ततस्तस्याग्रेषस्तं प्रणनाम कृतांजलिः पूजयामास सर्वेशं पुनः स
प्रणतो भवत् २ अथ पूर्वोपनिषद्भिस्तं तुष्टाव करसंपुटः नागेन्द्रः प्रार्थयामास भ
क्तिनम्रात्मकंधरः ३ शेष उ० योगींद्र त्वं गणाध्यक्ष ब्रह्मणां नायकः स्मृतः कथं
मे पुत्रभावेन संस्थितोसि विडंबनं ४ ततो गजाननस्तं वै मोहयामास मायया मो
हितो नागराजस्तं पुत्रं मेने गजाननं ५ शेषो बालं समागृह्य लालयामास सस्त्रि
यः क्रमेण पंचवर्षस्थो बभूव तद्गृहे प्रभुः ६ अथ शृणु प्रजानाथ वृत्तांतं दैत्य
संभवं मायाकरासुरो दुष्टश्चकार कर्मखंडनं ७ आसुरं कर्म सर्वत्रं [illegible] लं तेन। ढ३
दुरात्मना तेनो षोषणसंयुक्ता बभूवु [illegible] देवनायकाः ८ ततो हाहाकृतं सर्वै
र्येणाश्रमयुतैर्जनैः न स्वाहा न स्वधायं वै कर्तुं केनापि शक्यते ९ ततो मु

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

व१ निशाः सर्वे देवास्तं भृगुपुरोगमाः विचारं दैत्यनाशार्थं चक्रुर्मयसमन्विताः ९
१० तत्रोवाच महायोगी बृहस्पतिरुदारधीः गणेशं भक्तिसंयुक्ता भजध्व
ध्वं परमात्मने ११ चतुःपदार्थसंयोगी गणेशो निजबाधकः चतुर्भिर्वर्जि
तश्चायं हनिष्यति महाखलं १२ श्रुत्वा ते गुरुसंयुक्तास्तेपुस्तपो महत्त्वभो
निराहारादिसंयुक्ता नानानुष्ठानतत्पराः १३ गते वर्षशते पूर्णे प्रसन्नो भूद्ग
जाननः आययौ तान् वरं दातुं भक्त्यानुष्ठो महायशाः १४ तं दृष्ट्वा हर्षसंयुक्ता
देवा मुनय आदरात् प्रणेमुः पूजयामासुः स्तुष्टुवुर्विविधैः स्तवैः १५ वरं प्रासु वि३
मोराद् दैत्यगणेशं सर्वनायकं दैत्यं जहि गणाध्यक्ष मायाकरासुरं प्रभो १६ त
थामायाविहीनाश्च वै भक्तिं देहि त्वदीयकां दास्यं ते पादपद्मस्य न यस्त्वं निस

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मौ०पु० त्राय: ११ श्रुत्वा तान् गणनाथस्तु जगाद हर्षसंयुतः मायाकं रहनिष्यामि त्रै- ख०५
६० षपुत्रोहमंजसा १८ तत्र मे वाहनं मुख्यं पदि भवति देवपाः चतुर्देवम-
यं विप्रास्तद्यास्त दुःकरोम्यहं १९ मदीया भक्तिरूपा वो भविष्यति न निश्चि-
तं सुदृढा मे सदादासा भविष्यथो विशेषतः २० एवमुक्त्वा तन्द घेसौ गणेन्द्रो
शेषध्या५ देवनायकः [redacted] नात्समुद्भूतो भक्तानां कार्यसिद्धये २१ अथो देवर्षि-
मुख्यास्ते विचारं चक्रुरंजसा चतुर्देवमयस्यवाहनं कीदृशं भवेत् २२ सर्वा-
स्तत्र शिवः साक्षाद्वाचवाक्यमुत्तमं देवमूर्तिमयो देवः सर्वेषां गुरुरंजसा
२३ शिवउ० मूषकवाहनश्चापं वेदेषु कथितो भवत् मूषकस्तेयेन याथा-
नुर्हीनव्यस्तेय मनहा धृक् २४ नामरूपात्मकं सर्वं तत्रासहूत्म वर्तते ॥ ६०

नामरूपेषु ये भोगास्तेषां भोक्तृस्वमायया २५ भोगेषु भोगभोक्ता पस्तद्दाकारेण
वर्त्तते अहंकारयुतास्त्वं वै न जानन्ति विमोहिताः २६ वयं भोक्तार एवं ते मानयन्ति
विशेषतः ईश्वरः सर्वभोक्ता च चौर्यवत्तेषु संस्थितः २७ तदेवमूषकः प्रोक्तो मनु
जानां प्रचालकः मायारूढरूपः स भो गान्भुनक्ति चौरवत् २८ तद्वज्जीवन
गो देवः सूर्य आत्मा विशेषतः नानाजीवेषु भोगान्वै भुनक्ति चौरवत्स्वयं २९ समेषु
६० सर्वभोक्ता चैव विष्णुस्तौ न्न संशयः सदसन्मयरूपस्य चौरवन्मायया प्रभुः ३० सह
जेषु तथा देवा भोक्तारो योगः शिवः चौरवत्तात्र सं निर्मोह येमायायुतः ३१ देहो ३
भोक्तारं चौरभावस्थं वाहनं कुरुत प्रियाः पूषकाकृतिरूपं वै दीपतां गणपायत
त ३२ स्मृत्वा ते हर्षिताः सर्वे देवर्षयो बभूवन् शिवं साधु साधु त्वया प्रोक्तं सर्वेत्र

स्त्वं सदाशिव ३३ ततो गणेश्वरं ध्यात्वा चतुर्भिः कल्पितं वपुः तच्च स्वांशा
द्दुर्देवा मोक्षरूपं प्रजापते ३४ तदंशेन सञ्जीवो भून्मूषको बलसंयुतः ब्र
ह्मादिदेवर्षिभिः सार्द्धमभिषेकं चकार ह ३५ अंतर्बोत्थादिकेस्तैः पं सर्वत्रव
र्तितेपरं नानाविधैः तथैकल्पे तेषु गणनायमुच्यते ३६ अभिषिक्तः स्वयं तत्र
मूषकोह हर्षितोभवत् यज्ञभागस्य भोक्तासौ कृतो देवैः सवासवैः ३७ तं गृह्य
सर्वदेवास्ते मुनयः शेषमंदिरं आजग्मुस्तान्समालोक्य शेषश्च विस्मितो
भवत् ३८ पूजयामास सर्वान्सनागराजो महायशाः नानासनेषु संस्था
प्य पुनस्तान्प्रत्युवाच ह ३९ शेष उ० धन्यं जन्म मदीयं वै ज्ञानं तपः
स्वभावजं पितरौ मुनियो देवा दर्शनाद्भवतां किल ४० किमर्थमागताः सर्वे

+ पुत्रत्वमापन्नो ब्रह्मणो नायकः प्रभो॥४३॥ मूषकगावतारोयं पंचवर्षवयोन्वितः॥ मा+३

वदन्त मां सुरर्षयः भवतां कृपया पुत्रः करिष्यामि समन्ततः ४१ तस्य तद्वचनं
श्रुत्वा शंकरः सर्वनायकः जगाद नागराजं तं हर्षयन् हर्षवर्द्धनः ४२ त्रिविक्रं०
शेषशेष महाभाग धन्यस्त्वं सर्वमंडले तवैव पुत्रत्वं विजानीहि तपसा ध्यानजं
मर्मं ४४ तस्येदं वाहनं मुख्यं चतुर्देवकलांशजं स्तोपयधर्मे चरं पूर्णं सर्वेषां
हृदि वर्तते ४५ अस्योपरि समारूढ्य मूषकगः मता पवान् मायाकरासुरं
सद्यो हनिष्यति गणेश्वरः ४६ एवं तेषां वचः श्रुत्वा खेदयुक्तः स नागराट् न
किंचित्संजगौ देवान् पुत्रवान् सत्यभावनः ४७ ततस्तं शंकरो देवः उवाच व
चनं पुनः मा खेदं कुरु कल्याण विघ्रहान मरिष्यति ४८ तपोभिर्विविधैर्देवैः व्य२
मुनिभिः प्रार्थितो भवत् मायाकर विनाशाय त्वव पुत्रो गजाननः ४९ त्वया

तैनपसादेवआराधितोगजाननः वरदानप्रभावेणतवपुत्रोवभूवह ५० त
स्मिन्नंतरेतत्रमूषकगः समागतः नागबलैर्महाभोगैः क्रीडायुक्तोगजाननः।
५१ तेदृष्ट्वादेवर्षिविप्राः समुनस्तुः प्रणेमुर्मुमुदुः सामवेदस्थेनस्तोत्रेणैग
णेश्वरं ५२ ततस्तान्गणराजोवैवचनंहितकारकं उवाचवृषणान्प्राप्तावरं
मनेप्सितपरंनैतोनिहर्षसंयुक्तास्तमुचेस्तसुरर्षयः मायाकरासुरंस्वामीन्ज
हिसर्वभयंकरं ५४ भक्तिंदेहिगणाधीशत्वत्पादेचनिश्चलां दासावयंगणेशा
नपालयस्वविशेषतः ५५ तथेतितान्तुवाचाथवाहनंमेनवर्तते अतोयोग्यंम
हादेवावाहनंदीयतांपरं ५६ चतुःपदार्थरूपेण्योमराणांनप्रविद्यते मायाक
रस्यदुष्टस्यकथंकार्यंमयासुराः ५७ चतुःपदार्थरूपंमेवाहनंयदिजायतेत

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

द्राहंतं हो निष्यामिनात्र कार्या विचारणा ५८ इति श्रीमद्गौते मौद्गले ० लं ० पं ० मू
षकगदेव समागमो नामैकोनविंशतितमो ध्यायः १९ मुद्गल ० मूषकगवचः श्रु
त्वादेवं द्राहर्षितो बभुः ऊचुः प्रांजलयस्तंते विघ्नेशं विघ्नवारणं १ देवर्षयऊ
चतुर्ब्रह्ममयं देववाहनं ते प्रवर्तते स्वानंदे मूषकाख्यं च सर्वभोगकरं परं २
अधुनाभोगकारं तु चतुर्भिः शिवमुख्यकैः कृतं स्वकं स्वकलांशेन वाहनं तस्ता
ज्ञानानं जीवेषु सर्वभोक्ता वै चौरवत्परमेश्वरः तदेववाहनं ते मूषकं ब्रह्मणस्ते
परूपिणं ४ एवमुक्त्वा गणेशानं देवामुनिसमन्विताः तुष्टुवुस्तं महावीर्यं
मूषकं मूषकाकृतिं ५ देवर्षयऊचुः मनस्तेस्तेयरूपाय सर्वलक्ष्याय
धीमते अंतर्भोगकरायैवमूषकायनमोनमः ६ मायायास्तेयरूपिण्या

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मोहयित्वा चरारं चै चौरवद्योगकर्ता त्वं चौररूपायते नमः ७ चराचरम
याय्यैव चराचर धरायते सर्वाधीशाय कालाय कालकालाय ते नमः ८ ।
अनादये महेशाय चतुर्वर्गप्रदायिने गणेशवाहनायैव गणेशध्वजसंस्थि
ते ९ सर्वत्रगगणाधीशस्तत्याल्हादस्य नसंशयः चालकमपवीर्ययक्षणे
शास्यलमंजसा १० ब्रह्माकारशरीराय भक्तानां स्वस्वरूपिणे नमो नमः प
रेशाय चतुर्मयस्वरूपिणे ११ चतुर्णां गणपः पात्यत्वा यानद्रूप धारिणे ।
भव वाहनमुख्यं वै गणेशस्याधुना प्रभो १२ इति स्तुतः प्रसन्नात्मा मूषक
स्तानुवाच ह भविष्यामि महाभाग वाहनं गणपस्य च १३ एवमुक्त्वा गणे
शानं तु षावलब्ध धीः प्रभुं मूषको दर्शनैनैव हर्षयुक्तो महाद्युतिः १४ मू

षव॰ ३० मूषकगायदेवाय नमस्ते योगरूपिणे गणेशाय परेशाय परात्परतरा
यते १५ अनंताय महेशाय महेशैः संस्तुताय च विघ्नेशाय महाविघ्नधारिणे
ते नमो नमः १६ अनंतसूत्रवेतुभ्यं दैत्यदानवमर्द्दिने देवानां पालकायैव हेरं
बाय नमो नमः १७ स्वानंदवासिने तुभ्यं भक्तस्वानंददायिने ब्रह्मणां ब्रह्मणां
चैव तेपेपते नमो नमः १८ चतुर्णां चालकायैव चतुःसंयोगमूर्त्तये चतुर्णां पा
ददात्रे ते तेहींनाय नमो नमः १९ योगेशाय योगरूपाय योगीभ्यो योगदायिने
शांतिरूपाय वे तुभ्यं शांतिदाय नमो नम २० मूषकवाहनायैव मूषकध्वजि
ने नमः सिद्धिबुद्धिपते नाथ भक्तेशाय नमोस्तु ते २१ वेदवाक्यप्रमाणेन
मां करुष्व गजानन वाहनं भक्तिसंयुक्तं सेवायै ते नमो नमः २२ मूषकगद

मौ०पु० दंना मम मदीयगं त्वया धृतं अतो मे दमर्पि भक्तिं देहि नाथ नमोस्तु ते २३ मदीया रवं०५
६४ नाथस्वरूपेण नामतेचाभवत्प्रभो मूषकगस्ततो भक्तं मां कुरु प्रमहाम्द्भुतं २४ ग
वं स्तुत्वा गणाधीशं प्रणनाम सदंडवत् तमुस्थाप्य गणाधीशो जगाद भ
सा४ क्तिसंयुतं २५ मूषकग उ० वाहनं मे सदा धीर भविष्यति म मते मदीया भ सा४
क्तिरत्यंत सुदृढा ते भविष्यति २६ त्वया कृतमिदं स्तोत्रं मदीयं भक्तिदं भवेत्
धर्मार्थकाममोक्षाणां दायकं सर्वदं परं २७ पठते शृण्वते चैव तस्य पुत्रपौत्रा
दिकं प्रदं यं यं मिच्छति तं तं वै सफलं प्रभविष्यति २८ अन्यत्वं शृणु मे वाक्यं
द्वैविधैः कृतं महत् स्तवनं सर्वमान्यं ते भविष्यति न संशयः २९ येस्त्वां
स्तोष्यंति चैतेन स्तोत्रेणानेन मानवाः स सर्वं लभते नित्यं मिप्सितं नात्र ६४

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

संशयः ३० अनेस्वानंदगो भूत्वा ब्रह्मभूतो भविष्यति मदीयपद्रूपयासोपि
त्वत्समो मे प्रियो भवेत् ३१ एवमुक्त्वा महादेवं मूषकं गणनायकः तमाहूत्वा
ययौ तत्र यत्र दैत्याधिपो भवत् ३२ तमनु देवराजानो देवाश्च मुनयः प्रभो
नागाः शेषमुखाः सर्वे पशुभयसमन्विताः ३३ ब्रह्माणं प्रेषयामास मूषकगः
प्रतापवान् दूतं मायाकरस्याग्रे बोधार्थं नीतिपालकः ३४ गत्वा तमसुरं
ब्रह्मा जगाद वचनं हितं शरणमाखुवाहस्य याहि नो न मरिष्यसि ३५ चतु चे
र्णां ब्रह्मणां योगे मूषकगः प्रकीर्तितः स्वानंदवासकारी सगणेशोयं विचारय
३६ सुरासुरमयश्चायं तं गच्छ भक्तिसंयुतः मम पुत्रत्वमापन्नो हितं तत्प्रवदा
म्यहं ३७ ब्रह्मणो वचनं श्रुत्वा क्रोधयुक्तस्तमब्रवीत् मायाकरासुरः पापी

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

पापयुक्तेन चेतसा ३८ स उवाच त्वं देव पक्षगो भूत्वा मोहनार्थं समागतः ।
पंचमं ब्रह्म सर्वत्र तिष्ठति योगरूपकं ३९ तद्देवनागतं पुत्रनगतं च प्रजाप
ते समागतं गणेशानं त्वंहनिष्यामि सामरं ४० त्वं गच्छ दूतरूपेणागतस्तस्मा
न्महात्मने सत्यमिति परायं वैनो च ध्यन्नि सुरप्रियं ४१ ततो ब्रह्मा गणेशान
मायया प्रतिपत्य तं दृष्ट्वा तं नं कथयामास तत्क्षुत्वा क्रोधमादधे ४२ देवाना
ज्ञापयामास मूषकगो जगामापतं ततस्तत्र यास्य संघाते जंमु दैत्यगणान्मृ
मि३ धे ४३ छिन्नभिन्ना असुरास्ते पपलुर्गृत्समसंस्थिताः सभासीनं समाच
ख्युर्मायाकरासुरं वचः ४४ दैत्या ऊचुः किं स्थितोसि महावीर देवाः क्रो
धसमन्विताः आगतो नगरं सर्वं तेषामस्त्रैः सुपादितं ४५ तेषां त्वह ६५

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

चनं स्मृत्वा क्रोधयुक्तः समाययौ प्रधानैरसुरैः सर्वैः संवृतो रणमंडलं
४६ मायाकरं समालोक्य पपलु देवसत्तमाः मूषकं गंसमागम्य ज्ञात्वा तं सु
खेष्टितं महत् ४७ इति श्रीमद्गांते मौद्गले ० पं० ल० मूषकमायासुरसमा
गमो नाम विंशतिमोध्यायः २० मुद्गल० मायाकरासुरं वीक्ष्य नुत्तो षगा
णनायकः मूषकं स समारुह्य ययौ संग्रामंडलं १ चतुरायुधसंयुक्तं
दृष्ट्वा विघ्नेश्वरं खलः दैत्यानाज्ञापयामास देवानां हननाय सः २ ततो दै
त्यगणाः सर्वे क्रोधयुक्ता महाबलाः ववर्षुः शस्त्रधाराभिर्मेघा इव सु
दुर्मदाः ३ दृष्ट्वा देवगणाः क्रुद्धा युयुधुस्ते समागतान् एवं युद्धं महाघो
रं सैन्ययोरुभयोरभूत् ४ परस्परं जयेप्सन्तो मम्लुः संमुखमेत्य ते रक्तौ

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

चैः मरितातत्रसंजाताभयदायिनी ५ कदाचिज्जयिनोदैत्याः कदाचि
दमराम्मृधे नराश्चैव विश्रमंतेतु चक्रिरे क्रोधसंयुताः ६ एवं [illegible] दिनानि
समेवयुयुधुः शास्त्रकोविदाः पपलुरमराभिन्नाहाहारवकराभृशं ७ न
दृष्ट्वाशंकरः क्रुद्ध आययौरणमंडलं ततोविष्णुमुखादेवायुयुधुः क्रोध
संयुताः ८ तेषांमुष्टिप्रहारेणमृतादैत्याअनेकशः पपलुर्भयभीतश्च
दिशोदशप्रजापते ९ मूर्छितादैत्यराजानः सर्वेभूतलमाश्रिताः दृष्ट्वा
सिंहरवंकृत्वामायाकरः समाययौ १० क्रोधयुक्तोमहादैत्यः शस्त्रव
ष्टिंचकारह तयादेवाः क्षताभूमौपेतुः सर्वेप्रजापते ११ अन्यस्त्रे
णमहादैत्यः पातयामासशंकरं अन्येदाहयुताः सर्वेपपलुश्चदिशो

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दन्ता १२ एवं तस्य बलं दृष्ट्वा मूषकगस्तु तोषहृ स्वयं समागतो हर्षाद्रणभूमौ महा
बलः १३ दृष्ट्वा मूषकसंस्थं तमुवाच दैत्यनायकः क्रोधयुक्तप्रहस्यादौ वचनं म
घपोयथा १४ मायाकरासुरउवाच किं संग्राममायविघ्नेशस्समागतो मयासह
एकबाणेन त्वां हत्वा हनिष्यामि सुरान्मुनीन १५ चतुःपदार्थरूपं वै जगत्स
र्वं प्रवर्तते तस्माद्ब्रम्हाणां नास्ति किं करिष्यसि देवप १६ ब्रह्मांडं निर्जितं ये
न ते नमसाद्दृ गजानन योद्धुमिच्छसि बा[illegible]लः सन्बालभावात्वमंज्ञायः १७ नत्वा
न६३ मां स्वगृहं याहिंनिष्यामि निश्चितं त्वामज्ञानसमायुक्तः प्रेरकांस्ते निह[illegible]म्यहं। न्यपु
१८ मूषकगश्चैते नामारवतुल्यस्त्वं मतोपतः मूर्ख्वं वन्नैव जानासि मां सर्वभ
यदायकं १९ एवमायां कर्वीक्ष्य ब्रूवंतं स्वपराक्रमं मूषकगस्तमानं दाज्ञ

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

गादवचनं हितं २० मूषकगण० किंमा वदसि दैत्येंद्र नाहं बालो सुराधम स्थानं
मदत्वा सकारी वैत्वां हं तुं रूपवान्परः २१ हनिष्यामि न संदेहः श्चतुर्भिर्वेर्जितो धु
ना पश्य मे पौरुषं मूर्ख बालस्य दैत्यनायक २२ इत्युक्त्वा के घसंयुक्तः कमलं।
निजहस्तगं बिंदुब्रह्ममयं ज्योतिस्तस्याज्य मूषकेन्द्रागः २३ आगतं कमलं
दृष्ट्वा ज्योतिरूपमयं महत् मायाकरासुरस्तं वै जग्राह बलगर्वितः २४ गृहीत
दैत्यराजेन हस्तगं न च हस्तगं पपात कंठदेशेस्य ममार दैत्यनायकः २५ क
मलं गणराजस्य हस्तगं पुनरंजसा बभूव चासुरेन्द्राना विस्मितास्संबभूवि
रे २६ अहो मायाकरो राजा कथं ममार गर्वितः न्द्राशीरं याहन्त्रां तस्यता दृन्त्रां
हन्त्रूपेण धुना २७ तेजः समागतं त्वद्यत्रतेन तेजो हतं मृधे न्द्रारत्र घासविह्नि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नायेममारदैत्यनायकः २८ ततोदैत्यगणाः सर्वेतुष्टुवुः करसंपुटाः पातालंवि
विश्वर्दक्षदेवाहर्षयुताबभुः २९ मूषकगंनमस्कृत्यमुनिभिस्तत्वकोविदैः दैव
गणाः पुपुजुः सर्वेतुष्टुवुः करसंपुटाः ३० देवर्षयऊचुः मूषकगायसर्वेषांभो
गमोक्षैनमोनमः सर्वदेवाधिदेवायगणेशायनमोनमः ३१ लंबोदराय
विघ्नानांनायकायपरात्मने भक्तानांविघ्नहर्त्रेते विघ्नदात्रेदुरात्मनां
३२ हेरंबायनमस्तुभ्यंभक्तवत्सलरूपिणे स्वानंदवासिनेचैवपरेशायन
मोनमः ३३ महोदरायसर्वेषांपूज्यायसर्वरूपिणे सर्वादिपूज्यकायैववक्र
ते२ तुंडायतेनमः ३४ त्रिनेत्रायचतुर्हस्तायकमलधरायते मूषकोपरिसंस्था
यज्येष्ठराज्ञायतेनमः ३५ अमेयायगणाध्यक्षभूर्यकर्त्रेप्रधारिणे सर्वेशायन

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

समस्तभ्यं ब्रह्मणे ब्रह्मरूपिणे ३६ आनादये तथा मध्ये नानाभूपवशायते अनंताद्भुत
रूपाय त्रिस्वरूपाय वै नमः ३७ वृषपुत्राय जैवाय परमार्थायते नमः ३ सर्वेषां जन
कायैवमात्रे ब्रह्मेशाते नमः ३८ स्रष्टृपात्रे च संहर्त्रे गुणेशाय नमोनमः शांति रू
पाय शांतिभ्यः शांतिदाय नमोनमः ३९ अपार गुण धाराय [illegible] यायिनां
हृदि संस्थित तें किस्तो मोगपद्मा धीशां नमोनमः प्रसीदनः ४० एवंस्तुत्वा गणे
शानं प्रणेमुस्ते सुरर्षयः तानुवाच प्रसन्नात्मा मूषकगः प्रहर्षितः ४१ मूषकग
नुवाचच कृतं मे स्तवनं सर्वैर्भवद्भिः सर्वदं भवेत् यंयमिच्छति तं तं वै दास्यामि
भक्तियंत्रितः ४२ पठतां शृण्वतां नित्यं स्वाधीनोहं भवामि च भुक्तिमुक्तिप्रदं
पूर्णं पुत्रपौत्रादिवर्द्धनं ४३ वरं वृणुत देवे[illegible]शा देवा मुनिसमन्विताः दास्या

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

